# प्रथमोऽध्यायः

1. महर्षिवशिष्ठस्य संस्कृतवाङ्मये महत्वं वैशिष्ट्यमञ्च

2.महर्षिवशिष्ठस्य ग्रन्थानां विवेचनम्

# 1. महर्षिवशिष्ठस्य संस्कृतवाङ्मये महत्वं वैशिष्ट्यमञ्च

सर्वलोकचरं सिद्धं ब्रह्मकोशं सनातनम् ।[1]
ऋषीणां च वसिष्ठस्त्वं वासवस्तथा ।। [2]
वशिष्ठं श्रेष्ठमासीनमृषीणां भास्करद्युतिम् ।।[3]
परमध्यात्मकुशलमध्यात्मगतिनिश्चयम् ।
मैत्रावरुणिमासीनमभिवाद्य कृताञ्जलिः ।।[4]

ऋषिः च मुनिः द्वै विशेषणे महर्षिवसिष्ठाय प्रयुज्यते। अतः द्वयोः विशेषणयोः अर्थ स्पष्टीकरणं कृतम् ।

**ऋषिमुनि शब्दयोः निष्पत्तिः**

ऋषि–मुनि–विप्र–मेधावी–कवि–कारु इत्यादि बहवाः शब्दाः वेदेषु उल्लिखिताः सन्ति ।

तत्र ऋषि–मुनिश्च शब्दौ द्वयौ महत्वपूर्णौ ।

**मुनि–ऋषिशब्दद्वयोः मध्ये भेदविवरणम्**

ऋषिमुनिश्च एकैव नास्ति। द्वयोः भिन्न–भिन्न व्यक्तित्वे प्राच्यग्रन्थेषु प्रदर्शिते ।

वैदिकयुगे विचारस्य द्वै भिन्नाधारे दृष्टिगोचरो भवति। प्रथम तु वेदधारा अपरश्च पुराणधारा ।[5]

पुराणधारायाः लक्ष्यं लोकवृतस्यानुशीलनं समीक्षणश्चं कृत्वा विपुल–विवरणं प्रदर्शितम् ।

तथा तु वेदधारा आरम्भात् धार्मिकी अन्यञ्च यज्ञेषु विशिष्टदेवान् उद्दिष्टं कृत्वा हविर्त्याविधिं महत्वं कथयति ।

पुराणधारा इत्युक्ते मुनिधारा च वेदधारा इत्युक्ते ऋषिधारा च ।

धाराद्वयस्य मध्ये पार्थक्यकल्पना अनुचितानास्ति। सम्भवतः पुराणधारा आरम्भकाले वैदिकमार्गात् ईदृशी संस्पृष्टा संश्लिष्टाश्च न अभवत् ।

अन्यञ्च पुराणस्य वेदानुसारिता सम्भवतः ईदृशः प्राचीनकालात् अनुमितं न कर्तं शक्नुवन्ति।[5]

आचार्यबलदेव उपाध्यायेन द्विविधधारायाः सत्ता पुराणप्रमाणेन सिद्धं कृता यथा मार्कण्डेयपुराणे –

उत्पन्नमात्रस्य पुरा ब्रह्मणोऽव्यक्त जन्मनः।
पुराणमेतद् वेदाश्च मुखेभ्योऽनुविनिः सृताः।।
वेदान् सप्तर्षयस्तमाज्जगृहुस्तस्य मानसाः।
पुराणं जगृहुश्चद्या मुनयस्तस्य मानसाः।। [7]

अर्थात् प्राचीनकाले ऋषिधाराश्च मुनिधाराश्च पृथक–पृथकरूपेण प्रचलिता। ऋषिन् वेदाः गृहीताः अपराश्च मुनीन् पुराणानां ग्रहणं कृतं तथापि ऋषिमुनयोः द्वयोः आविर्भावः ब्रह्मणः मुखात् जातः। मार्कण्डेयपुराणस्य पुराणसृष्टिं प्राक्कालिञ्च वैदिकसृष्टिं उत्तराकालिन् इति मतम् प्रकटितम्।

अतएव ऋषीन् वेदाः गृहीत्वा वेदानां विपुलीकरणश्च प्रसाराय प्रचाराय ऋषयः प्रवृताः। तस्येत्तर मुनीन् पुराणानि गृहीत्वा पुराणानां प्रचाराय–प्रसाराय महनीयकार्यं मुनयः व्यावृताः।

ऋषिश्च मुनिः शब्दद्वयौ एकद्वयस्य प्रर्यायः नास्ति। तस्य पुष्टिः आचार्यशङ्करेणापि सनत्सुजातीयभाष्यस्य उक्त्याधारेण कृताः। यथा –

निर्दिश्य सम्यक् प्रवदन्ति वेदः।
तद् विश्ववैरूप्यमुदाहरन्ति।।[8]

अत्र श्लोकभाष्ये उपनिषदां प्रचुरादोहरणानि दत्वा ब्रह्मविषयोः वैलक्षणस्य प्रतिपादनं कृत्वा पुराणस्थानप्रमाणं निर्देशयति तदा –

न केवलं वेदाः अपितु मुनियोऽपि तद् वैरूप्यं ब्रह्मविश्वरुप विपरीतस्वरूपमुवाहरन्ति। तथा चाहु भगवान पराशरः इति कृत्वा श्लोकद्वयं अवतरणं करोति।[9]

आचार्यस्योपरोक्तकथनस्य परीक्षणं दर्शयति यत् आचार्यशङ्करः ऋषिमुनि प्रकारद्वयमस्ति इति मन्यते।

**मुनिः –**

मुनिः शब्दो ऋग्वेदे ऋग्वेदेऽत्यधिकप्रयोगः न कृतः। उपनिषत्सु 'मुनि' शब्दः प्रसिद्धः जातः। अवान्तरे ऋषिश्च मुनिः शब्दौ द्वौ पर्यायवाचकौ भवितौ। ''सर्वोल्लेखाः दृष्ट्वा अनुमानेन आरम्भे 'मुनिः' शब्दो निजानन्दे निमग्नो भविता एवं चमत्कारीशक्तिः धारितवन्तः महापुरुषानां अर्थे 'मुनिः' शब्दो प्रयुज्यते। समाजस्य सभ्यो भूत्वा लौकिकजीवने यत्किञ्चत प्राप्तव्यमस्ति, तस्य इमान् मुनीन् चिन्ता न भेवत् इति। समयान्तरे सम्भवतः इमे मुनयः निवृतमार्गस्य ज्योतिर्धरा भविताश्च ऋषभ्यः एतादृशकथनं न समीचिनम्। कारणं यत् वेदस्य ऋषयः प्रवृत्तिमार्गस्य आसन्।[10]

ऋषिपुरोहितयोः द्वयोः मध्ये भेदोऽपि दर्शितः। यथा यज्ञकार्येषु वा कोऽपि धार्मिकक्रियासु वा यत्कार्येषु देवानांक्रिया तत्सर्वकार्येषु येनाग्रस्थापितः तं पुरोहितः अग्निदेवमपि पुरोहितः कथ्यते। अपरञ्च ऋत्विजोऽपि पुरोहितः कथिताः।

पुरोहिताः राजन्यानां वा मधवतां–सामान्यजनानां धर्मकार्यं कतृवन्तः इति पर्याप्तं न किन्तु राज्न्यादि नृपेभ्यः सह युद्धेऽपि भागं गृहीत्वा स्वस्याश्रयदातारं विजयाय देवान् प्रार्थयति। अधिकमात्रायां ऋषयः (महर्षिवशिष्ठेन सह) पुरोहितरूपेण कार्यकर्तारः आसन् तदपि पुरोहितश्च ऋषयश्च कार्यक्षेत्रं भिन्नमस्ति। महर्षिवशिष्ठः सूर्यवंशस्य पुरोहितः आसन् अन्यञ्च महानऋषिः अपि आसीत्। ऋग्वेदकाले महर्षिवशिष्ठेन तृत्सुनृपाणां च सुदास्य पौरोहित्यं कृतं च दाशराज्ञयुद्धे भागं गृहीत्वा सुदासनृपस्य विजयाय इन्द्रजं प्रार्थितं महाभारते पुरोहितः लक्षणानि दर्शितानि यथा –

**पुराणलक्षणानि :—**

अनृशंसाः सत्यवाच्या अकुसीदा अथर्णवः।
अद्रोहोनभिमानशस्च ह्रीस्तितिक्षा दमः रामः।।
यस्मिन्नणेतानि दृश्यन्ते स पुरोहित उच्यते।[11]

धीमान् सत्यधृतिर्द्धान्तो भूतानामविहिंसकः।
अकामद्वेषसंयुक्तर्त्विजस्तात् शक्लैः समन्वितः।
अहिंसको ज्ञानतृप्तः स ब्रह्मासनमर्हति।
एते महर्षिजस्तात सर्वे मान्यायथाहितः।।[12]

ऐतरेयब्राह्मणे ऐतशमुनिं शब्द निर्वचनम्—मुनेः पुत्रः मनोविकृतं मन्यते।
मनुते जानाति यः स मुनिः।
मन् धातोः मनेरुच्च इति।।[13]
उणादिसूत्रेण इन् प्रत्ययः अकारस्य उच्चेति मुनिः।[14]
शून्यागारनिकेतः स्याद् यत्र सांयगृहे मुनिः।[15]
मननान्यमुनिनः स्तोता।

स यथा – बहुविधं शब्दमुत्यापादयति् एवं आचार्यसायणेन – महाभारते भगवानकृष्णस्य पूर्वकालिककनतपवर्णने मुनिलक्षणं यथा—

जरा वर्षसहस्राणि यत्रसायंगृहो मुनिः।
व्यवस्स्त्वं पुराकृष्ण पर्वते गन्धमादने।।

दश वर्षसहस्राणि दश वर्षशतानि च।
पुष्करेष्सवसः कृष्ण त्वमयोः भक्षयन् पुरा।।

उर्ध्वबाहुः विशालायां बदर्यां मधुसूदने ।
आतिष्ठ एकपादेन वायुभक्षः शतं समाः।।

अवकृष्टोत्तरासङ्ग कृतो धमनिसंततः।
आसीः कृष्ण सरस्वत्यां तीर्थं सत्रे द्वादशवार्षिके।।

प्रभासमप्यथासाद्य तीर्थं पुण्यजनो चित्तम्।
तथा कृष्ण महातेजा दिव्यं वर्षसहस्रकम्।।
अतिष्ठज्ञत्व सत्वमथैकेन पादेन नियमस्थितेः।
लोकप्रवृत्ति हेतुंस्त्वमिति व्यासो ममब्रतीम्।।[16]

**रामायणेऽपि –**

नाराजके जनपदे चरत्येकचरो वशी।
भावयन्नात्मनाऽऽत्मानं यत्र सायंगृहोमुनिः।।[17]

अत्र सायंगृहोमुनिः शब्दप्रयोगः मुनिवैशिष्ट्यस्य द्योतकः इति।

महाभारतस्य नीलकण्ठीयव्याख्यानुसारेण यत्र सायंकालस्तथैव गृहं यस्य स यत्र सायंगृहं (मुनिः) इत्येकं पदम्।[18]

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।
वीतराग भयक्रोधः स्थिति धीर्मुनिरुच्यते।।[19]

महाकवि श्रीहर्षेण मुनिवृत्तिः ईदृशी दर्शिता। यथा –

फलेन मूलेन च वारिभूरुहां मुनेरिवेत्थे मम यस्य वृत्तयः।[20]

'मुनेः' साक्षात् सम्बन्धः तीव्रतपश्चरेण सह अस्ति। यः शून्यागारे निवसति एवं च गत्वा सायंकालं भवेत् तदा तत्स्थानैव निवसति सः (सायंगृहं मुनिः )[21]

**ऋषिः निर्वचनम् :–**

ऋषि शब्दस्य व्युत्पत्तिः

'ऋष्' गतौ (संख्या–1187 सि.कौ) धातु एवं दृश् (दर्शन) द्वाभ्यां धातुभ्यां मन्यते।

अब्रवीत् सुमहातेजा ब्रह्मा सुरुचिरं वचः।
ऋषिस्त्वंमसि भद्रं ते स्वार्जितैः कर्मभिः शुभैः।।[22]

यस्य वाक्यं स ऋषिः ––

या तेनोच्यते सा देवता।

यदक्षरपरिमाणं तच्छन्दः।।[23]

अजान्हा वै पृश्नींस्तयस्यमानात् ब्रह्म स्वयम्भवभ्यानर्षत् तदृषयोऽभवन्तदृषीणामृषित्वम्।[24]

निरुक्ताधारेण ऋषेः व्युत्पत्तिलभ्योऽर्थः –

दर्शनकर्ता, तत्वानां साक्षात् अपरोक्षानुभूतिकर्ताविशिष्टपुरुषः।

साक्षात्कृतधर्माण ऋषयो बभूवुः।[25]

तद्यदेनांस्तस्यामानाम ब्राह्मस्वयम्भवभ्यानर्षत् ऋषचोऽभवस्तदृषीणामृषि –त्वमितिं विज्ञायते ऋषिदर्शनात्। मन्त्रान् ददर्श इत्यौपमन्यवः।[26]

ऋषिदर्शनात्। स्तोमाब्ददर्शेत्यौपमन्यवः।[27]

पश्यति ह्यसौ सूक्ष्मानप्यर्थान् यादवृत्तिेलिखता।[28]

ऋषिति प्राप्नोति सर्वान् मन्त्रान्,

ज्ञानेन पश्यति संसारपारवा।

ऋष् +इगुपधात कित् इति उगादिसूत्रेण (4/111) इन् किञ्च।

**ऋषिमन्त्रदृष्टा :–**

गत्यर्थत्वाद् ऋषयोर्ज्ञानार्थत्वाद् मन्त्रं दृष्टवन्त ऋषयः।

श्वेतवनवासिरचित वृत्ति। उणादिसूत्र –4/129।[29]

ऋषिः शब्दः ऋष गतौ धातोः औणादिक इन् (इन् सर्वधातुभ्यः – उणादिसूत्र–4/126) प्रत्ययस्य योगात् निष्पन्नं भवति। अतः अस्य व्युत्पत्तिभ्योऽर्थः 'मन्त्रदृष्टा'' इति।[30]

ऋषिः सर्वगतत्वाच्च शरीरी सोऽस्य यत्प्रभुः। स्वामित्वमस्य यत्सर्व विष्णुः सर्वप्रवेशनात्। [31]

गत्यर्थादृषतेर्धातोर्नाम् निवृत्तिरादि।

यस्मादेव स्वयंभूतस्तस्माच्चाप्पृषिता स्मृता।।32

वायुपराणेन ऋषि% शब्दस्यानेकार्थाः दर्शिताः यथा–

ऋषीत्येष गतौ धातुः श्रुतौ सत्ये तपस्यथ।

एतत् संनियतस्तस्मिन् ब्रह्मणा स ऋषिः स्मृतः।। [33]

श्लोकानुसारेण ऋषिः – ऋषी धातुनः चत्वार्था भविताः

गतिः
श्रुतिः
सत्वम
तपस्।

ब्रह्मणा द्वारा यस्मिन् व्यक्तौ इमे चत्वारगुणाः नियताः ते ऋषयः कथ्यते।

ऋषिहिसागतौ धातुर्विद्या सत्यं तपः श्रुतम्।
एष संनिचयो यस्मात् ब्रह्मणस्तु ततस्त्वयम्।।

निवृत्तिसमकालाञ्च बुद्धयाव्यक्त ऋषिस्त्वयम्।
ऋषते परमं यस्मात् परमार्षिस्ततः स्मृतः।।

गत्यार्थात्वाद् ऋषतेर्धातोर्नामानि वृत्तिकारणम्।
यस्मादेष स्वयम्भूतस्तस्माच्च ऋषिता मता।।[34]

अत्र गतिशब्देन ज्ञान–मोक्ष–गमनश्चेति अर्थत्रयाः विविक्षिता।

**ऋषि गतौ इति धातुः**

सर्वधातुभ्यः इन् (उणादि सूत्र 4/557) इगुयधातु कित् (उणादिसूत्र–4/559)

वेदप्राप्त्यर्थं तपोऽनुतिष्ठतः पुरुषान् स्वयंभूर्वेदपुरुषः प्राप्नोत् –––।

तथातीन्द्रयस्य वेदस्य

परमेश्वरानुग्रहेण प्रथमतो दर्शनात्।
ऋषित्वमित्यभिमेत्य स्मर्यते –
युगान्तेऽन्तर्हितान् वेदान् सेतिहासान् महर्षयः।
लेभिरे तपसा पूर्वमनूज्ञाताः स्वयंभुवा।। इति।[35]

रजस्तस्तमोभ्यां निर्मुलास्तपोज्ञानबलेन।
येषां त्रिकालमेलं ज्ञानमव्याहुतंसदा।।

आत्रत्याः शिष्टाविबुद्धास्ते, तेषां वाक्यम्संशयम्।
सत्यं वक्ष्यन्ति ते कस्मादसत्यं नीरजस्तमः।।[36]

**अर्थेप्सवः ऋषयः**

ऋच्छति गच्छति अनेन इति ऋषिः। आप्रत्यः खलु साक्षात्कृतधर्माः –। ऋष्यार्यम्लेच्छानां समानं लक्षणम्। [37]

**ऋषिभेदाः**

रत्नकोषग्रन्थे ऋषिणां सप्तभेदा वर्णिताः यथा –

सप्त ब्रह्मर्षि–देवर्षि–महर्षि–परमर्षयः।
काण्डर्षिश्च श्रुतर्षिश्च राजर्षिश्च क्रमावराः।। [38]

मत्स्यपुराणेऽपि ऋषिभेदाः प्रकल्पिता।

ब्रह्मणः मानसपुत्रश्चर्यशाली स ऋषि स्वयमेवोत्पन्नः जातः निवृत्तमार्गे प्रवृतः स ऋषिः बुद्धिबलात् परमहानपुरुषत्वं प्राप्नोति। अथन्यञ्च स महानपुरुषार्थयुक्तः तस्मात् महर्षिः कथ्यते।[39]

तान् ऐश्वर्यशाली–महर्षिन ये मानसाश्चौरसा पुत्राः जाताः ते ऋषिपरकाः तेन कारणेन ऋषिः कथ्यते।[40]

मैथुनेनगर्भात् प्राणिना सर्वप्रथमम् उत्पन्नाऋषि पुत्रान् 'ऋषीक्' इति कथ्यते–कारणं यत् ते जीवनां भूतानां ब्रह्मपरकं करोति।[41]

ऋषिकानां पुत्राः भूतानां ऋषिपुत्ररूपेण ज्ञायते।

ते अपरात् ऋषिधर्मं श्रुत्वा ज्ञानसम्पन्नं भवति। अतः 'श्रुतर्षि' कथ्यते।[42]

विष्णुपुराणेऽपि त्रयऋषिभेदाः प्राकृतिता यथा

ज्ञेया ब्रह्मर्षयः पूर्वं तेभ्यो देवर्षयः पुनः।
राजर्षयः पुनस्तेन ऋषिप्रकृतयस्त्रयः।।[43]

मत्स्यपुराणे ऋषिभेदस्योदहरणानि अपि दत्तानि।[44]

एवं पुरातन् वैदिकाकाले ऋषिमुनिश्च द्वौ भिन्नभिन्नमार्गनौ स्तः। नानाप्रकारेण मुनिः अपेक्षया ऋषिः स्वनोपविशिष्टभिन्नश्चवास्ति पश्चात् द्वौ पर्यायवाची स्तः भवितौ।

महर्षिवशिष्ठोऽपि ब्रह्मणपुत्रश्च मन्त्रदृष्टाः तेन कारणेन ऋषिः अन्यं च एवं अग्निपुराणस्य वक्ताश्रोतापि अस्ति, अन्य पुराणेऽपि वसिष्ठवक्ताश्रोतारूपेण दर्शितः, तन कारणेन मुनिऽपि अस्ति। अतः मुनि–ऋषिद्वयोः शब्दयोः निर्वचनम् कृतम्।

**वशिष्ठः शब्दस्य निर्वचचनम् –**

वशिष्ठः – किं वा वशिष्ठः वा›मये शब्दद्वयं प्राप्तम्। वसिष्ठशब्दस्य निर्वचनं विविधकोषग्रन्थेषु पुराणग्रन्थेषु रामायण–महाभारतादिषु यथाकृतमस्ति तथा अत्रोपस्थाप्यते।

प्रथमे महाभारते महर्षिवसिष्ठो स्वयंस्वस्यनामविवेचना कृता। यथा–वसिष्ठ उवाच –

वसिष्ठोऽस्मि वरिष्ठोऽस्मि वसे वासगृहेष्वपि
वसिष्ठात्वाच वासाच्च वसिष्ठ इति विद्धि माम्।।[45]

**गन्धर्व उवाच –**

ब्रह्मणो मानसः पुत्रो वसिष्ठोऽरुन्धतीयतिः।
तपसा निर्जितौ श्वदजेतयावमरैरपि ।।
कामक्रोधावुभौ यस्य चरणौ संववाहतुः।
इन्द्रियाणां वशकरो वसिष्ठ इति चोच्यते।।[46]

सर्वस्य वासयचिततृमः अतिशयेन वासयिता।

वसिष्ठ शब्द विशेषणार्थे।[47]

वशिकः, स्त्री वशी वशीकरणं साध्यत्वेनास्त्यस्या। इति। वश् ठन्+ अगुरः इति ।[48]

वशिता, स्त्री, वशिनो भावः।

वशिन्+तल् वशित्वम् इति।[49]

मनो मय्या दध्धद्योगे मद्धर्म्मा वशितामियात्।।

वशित्वं क्लीः वशिनोभावः। वशिन्+त्व। आयप्त्म्।[50]
शास्त्रं सुचिन्तितमपि प्रतिचिन्तनीय
मराधितोऽपि नृपतिः परिशŠनीय।
अङ्ग स्थितापि युवतिः परिरक्षणीया,
शास्त्रे नृपे च युवतौ च कुतौ वशित्वम्।।[51]

यथा –

अणिमा लघिमा प्राप्तिः प्राकाम्य महिमा तथा।

ईशित्वञ्च वशित्वञ्च तथा कामावशायिता।।

वशित्वं स्वातन्त्र्यं येन स्वतन्त्रञ्चरति।[52]

वशिनी स्त्री! वशी वशीकरणं साध्यत्वोनास्त्यस्य इति।

वश+इनिः–डीप्। वन्दा शमीवृक्ष।[53]

वशीरं, क्ली। उरश्यते इष्यते इति वश+वाहुलकात् किरच्।

यद्वा वशिं वशत्वं रातीति। रा+कः। सामुद्रलवणम्।[54]

वशिरः पु.। वश+किरच्। गजपिप्पली। [55]

अस्य पर्यायो यथा ––

करि पिप्पलौ करुणा कपिपिल्लिका कायल्लिका।

श्रेयसी वशिश्यापि गजाह्वा गजपिप्ली।।

भुलिटा इति ख्यातः। अस्य पर्य्या यथा –

पार्वते चभ्यश्च कुरभो वशिरः कपिपिप्पली।

जामातासौ क्वचित्वक्तः सूर्यावर्त्तः सितोऽवरः।।[56]

चव्यम्। इति राजानिघण्टुः। अपामार्गः।[57]

वसिष्ठः पु. वशवतां वाशिनां श्रेष्ठः।

वशवत्+इष्ठन्। विन्मतोर्लुक।।[58]

यथा वसिष्ठः। पृशोदरादित्वात्। साधुः सन्धातीर्थानि।

स्वनामाख्यातमुनिः। तप्तपय्यार्यः। अरुन्धतीजानिः।[59]

अरुन्धतीनाथः। 3—वशिष्ठः। 4—इति शब्दरत्नावली।

स तु ब्रह्मणः प्राणेभ्यो जातः।

तस्य भार्य्या कर्दमकन्या अरुन्धती।।

पुत्रा सप्तषर्यः।

**श्रीमद्भागवते अपि च –**

वशिष्ठश्च तयोज्जर्या सप्तपुत्रानजीजनत्।

कन्याश्च पुण्डरीकाक्षां सर्वशोभासमन्विताम्।।

रजो गामोत्रो बाहुश्च भवनश्चा। नवस्तथा।

सुतपाः शत्रु इत्येते राजपुत्राः महौजसः।।

'वस' धातोः प्रेरकरूपे व्युत्पत्ति विचारिता।

प्राचीनकाले पुरुष्णी(नद्यः) तटे दाशराज्ञं युद्धं जातम्। तेषां वसिष्ठो पौरोहित्यस्य रक्षणाय इन्द्रस्तुतिः कारिता। तेन फलेन भरतानां राज्ञसुदासोपरि इन्द्रस्यविशेषकृपा भविता। अतः भरताः विजयी बभूवुः। तदारंभात् (डॉ. दाण्डेकरमतेन) सप्तसिन्धुप्रदेशे भरतसाम्राज्यं प्रस्थापितम्

एवं अस्य देशस्य नाम भारतवर्ष प्रसिद्धियते एव सप्तसिन्धुपद्रेशे भरताः निवासकारितवान् अतः ऋषिवसिष्ठो 'वासयिता' कथ्यते।[60]

वसिष्ठशब्दस्य धनवाचकशब्दो ''वसु'' शब्देन सह सम्बन्धो विचारितः। अतः आचार्यसायणेन 'वसिष्ठस्य अपरमेकोऽर्थः ''धनवत्तमः' इति कृतः।[61]

वसिष्ठशब्दस्य 'वासम्' (वस्त्रम्) शब्देन सह सम्बन्धो विरचितः। तदनुसारेण ''वसिष्ठः' इत्युक्तेसुन्दरवस्त्रधारणकर्ता।

अस्य सन्दर्भे सप्तमण्डले द्वौ ध्यानास्यादोल्लेखौ स्तौ।

श्वित्यञ्चो मा दक्षिणतस्करपर्दा धियंजिन्वासो।[62]

श्वित्यञ्चो यत्र नाम्नां कपर्दिनो धिया धीवन्तो असपन्त तृप्सवः।[63]

एकस्मिन् सूक्तेदुर्वासात्रऋषिः मा परा दाः। इति वसिष्ठेन प्रार्थिसम् श्वित्यञ्च श्वेतवर्णस्य वस्त्रयुक्तः (श्वेतवस्त्रवान्)।

वसिष्ठः –श्वेतसुन्दरवस्त्रधारणकर्तारः। येन कारणेन वसिष्ठनामना प्रकीर्तिताः इति अनुामनेन कथितम्।

वसिष्ठ शब्दस्य चतुर्थोऽर्थः श्रेष्ठः इति विचारितः। ऋषयोः वा इन्द्रं प्रत्यक्षं नाश्यन् तं वसिष्ठैव प्रत्यक्षं नापश्यन्।

**यथा लि›पुराणे –**

ऋषीणां च वसिष्ठत्वं देवनां वासवस्तथा।
ॐ कारः सर्ववेदा श्रेष्ठं साम च सामसु।।[64]

**महाभारते –**

वसिष्ठोऽस्मि वशिष्ठोऽस्मि वसेवासगृहेष्वपि।
वशिष्ठत्वाच्च वासाच्च वशिष्ठ इति विद्धि माम्।।[65]

अतः सर्वेऋषिषु वशिष्ठैव श्रेष्ठो येनार्थेन वशिष्ठः। इत्युक्ते 'वशिष्ठः' कथितः।

ऋग्वेदे 10/65/15 सूक्तऋचयोः दृष्टाः ऋषिवसुकर्णवासुकः अस्ति। स वशिष्ठवंशजोऽस्ति। अत्र वशिष्ठशब्दो अवटŠार्थेऽपि प्रदर्शितः।[66]

वशिष्ठ शब्दो पितरः तस्य विशेषेणार्थेऽपि प्रदर्शितः। तस्योऽर्थः सायणमते ''वस्तृतमाः, कृताच्छादनाः।'' धनवत्तमाः वा एवं करोति।[67]

इति ''वशिष्ठो'' शब्दो ऋषेः विशेषनामोपरान्तं विशेषणरूपेणाल्लेखितं यथा –

आ यस्ते अग्न इधते अनीकं वशिष्ठ शुक्र दीदिवः पावकः।[68]

अत्र अग्ने विशेषेणरूपेण प्रदर्शितवशिष्ठोशब्दो तस्यार्थः। सायणानुसारेण 'श्रेष्ठः' इति वेलणकरानुकरणनुसारेण (Richest) भवति।[69]

अदब्धप्रमतिर्वशिष्ठः इत्यग्निर्वै देवानां वशिष्ठः।[70]

यद्देवा अब्रबन अयं वै नः सर्वेषां।

वसिष्ठः इति तसमाद् वशिष्ठः।।[71]

श्रेष्ठस्तेन वशिष्ठोऽथो यद् वस्तृतमस्तेनो एव वसिष्ठः।[72]

नामस्य गुणतो जज्ञे वसतेः श्रेष्ठ्यकर्मणः।[73]

वसिष्ठशब्दस्योतिदर्शयामि। अथर्ववेदसायणभाष्ये वसिष्ठसन्दर्भित कतिपयोल्लेखाः। यथा –

हे हरिद्रादिरूप भेषजः, तथा वीरूधनामन्यासां वीरुधां वशिष्ठं वसुमत्तमं मुख्यमसि।[74]

वशिष्ठं वासयतितृतमं रोगनाशनम्।[75]

वशिष्ठ वासयितृतमः एवं भूतो अग्निः।[76]

अग्निः वशिष्ठः वासयितृतमः वसुमत्तमो वा भवतु।[77]

एवं वशिष्ठ वा वशिष्ठशब्दस्य निरुक्तविषये कोशेषु पुराणाख्यानां ग्रन्थेषु वैदिकग्रन्थेषु यद् विचरितं तन्मया समासतो निगदितम्।[78]

**महर्षिवशिष्ठस्य विवरणम् :–**

वशिष्ठः श्वेतवस्त्राणि धारयति स्म। एवं शिरसि दक्षिणभागे जटा ग्रन्थिता। अन्यच्च वशिष्ठः समृद्धवान् अस्ति।

भाल्लवेयी श्रुत्यानुसारेण सर्वपुरोहितेषु वशिष्ठं अधिकदक्षिणां दातव्यमिति।[79]

वशिष्ठेन सुदासदता दक्षिणायाः गौरवेनोल्लेखिताः। [80]

तथा तु विश्वामित्रस्य वशिष्ठद्वैषिणी ऋचायां लोधम' शब्दो आगच्छति यस्यार्थः 'लोभी' भवति। सम्भवतः वशिष्ठ विश्वमित्रयोः कलहस्य कारणं यत् सुदासदत्तधनमपि भवितुं शक्नोति।[81]

ऋग्वेदे महर्षिवशिष्ठस्य एकाप्रार्थनाध्यानाकर्षकाः अस्ति।

मा नो अग्ने अवीरते परा दा दुर्वासे ––। ''मलिनवस्त्रंधारणस्य दरिद्रता अस्मिन् न प्राप्नोति।

**ऋग्वेदे वशिष्ठशब्दस्य विभिन्नविभक्त्यां प्रयोगाः –**

धनुर्वेदसंहितायाः प्रतिपादकः महर्षि वशिष्ठः वैदिकऋषिः सर्वेषु वैदिक –ग्रन्थेषु पुराणेषु–धर्मशास्त्रेषु अन्येषु च संस्कृतवा›मयेषु च वशिष्ठस्य स्थानं महत्वपूर्णं दरीदृश्यते।

अतः स्वाभाविकीयं जिज्ञासा जागर्ति यदस्य धनुर्वेदसंहितानामधेयस्य लौकिकसंस्कृतेविरचितस्य ग्रन्थस्य रचयिता कतमः। वशिष्ठः वैदिकः, पौराणिक आचार्याः फलेषु उत्पन्नो कोऽपि अन्योऽपि वशिष्ठः? पौराणिक परम्परायां दृश्यते यद् व्यासनाम्नां विदुषां परम्परां प्राचीनकालादैव समागता। वशिष्ठनाम्नापि वैदिककालाद् आचार्यकाल पर्यन्तं वशिष्ठाभिधा बहवो वशिष्ठाः संजातः। यथा ऋग्वेदे भिन्न– भिन्नविभक्तिषु वशिष्ठशब्दो प्रायोजितः।[82]

आचायर्स्ते यस्ते अग्न इधते अनीकं वशिष्ठ शुक्र दीदिवः पावक।

उतो न एमिः स्तवथैरिह स्याः।।[83]

बृहदु गायिषे वचोऽसूर्या नदीनाम्।
सरस्वतीमिन्महया सुवृक्तिभिः स्तौमैर्वशिष्ठ रोदसी।।[84]

प्र शुन्ध्वयुवं वरुणाय प्रेष्ठां मतिं वसिष्ठ महदाहु मरस्व।
च ईमर्वाञ्च करते यजत्रं सहस्रामधं वृषणं वृहन्तम्।।[85]

**वशिष्ठः (प्रथमा ए.ब.)**

त्वामग्ने समिधानो समिधासो वसिष्ठो
जरुथं हन्याक्षि राये पुरन्धिम।
पुरुणीया जातवेदो जरस्व यूयं पातस्थस्वस्ति सदा नः।।[86]

बोधा सु मे मघवन्वाचमेमां यां ते वशिष्ठो अर्थात् प्रशस्ति इमा ब्रह्म सधमादे जुषस्व।।[87]

एव वसिष्ठ इन्द्रमूर्तये नृन्कृष्टीनां वृषभं सुते गृहणाति।
सहस्रिण उप नो माहि वाजान्यूयं पात स्वस्तिभिः सदा नः।।[88]

धेनुं नत्वा सूर्यवसे दुदुक्षन्नुप ब्रह्माणि ससृजे वशिष्ठः।
न ते भोजस्य सख्यं मृषन्ताधा सूरिभ्यः सुदिता व्यूच्छान्।।[90]

त्वामिन्मे गोपतिं विश्व आहा न इन्द्रः सुमतिं गन्त्वच्छ।
प्रये गृहादममदुसत्वाया पराशरः शतयातुर्वसिष्ठः।
दण्डाद्ववेद्गोअजनस्य आसन्यरिच्छिन्ना भरता अर्भकासः।
अभवच्च पुराएता वशिष्ठ आदित्रृत्सूनां विशो अप्रथन्त।।[91]

स प्रकेत उभयस्य प्रविद्वान्त्सहस्रदान उतवा सदानः।
यमेन ततं परिधं वयिष्यन्नप्सतरसः परि जज्ञे वसिष्ठः।।[92]

उपैनमाध्वं सुमनस्यमाना आ वो गच्छति प्रतृदो वसिष्ठः।।[93]

यमेनततं परिधिं वयिन्तोऽप्सरस वयन्तोऽप्यरस उप सेदुर्वसि।।[94]

वयं नु ते द्वादश्वासः स्याम ब्रह्म कृण्वन्तो हरिवो वसिष्ठाः।।[95]

प्रति त्वा स्तोमैरीकृते वसिष्ठा उषर्बुधः सुभगे तुष्टुवासः।।[96]

यां त्वा दिवो दुहितर्वर्धयन्त्युषः सुजाते मतिर्भिर्वशिष्ठाः।।[97]

प्रति स्तोमेभिरुषसं वशिष्ठा गीर्भिर्विप्रासः प्रथमा अब्रुधन्।।[98]

अर्वन्तो न श्रवसो भिक्षमाणा, इन्द्रवायू सुष्टुतिभिर्वसिष्ठाः।।[99]

ये न पूर्वे पितरः सोम्यासोऽनूहिरे सोमपीथं वशिष्ठाः।।[100]

**वसिष्ठाः वसिष्ठाय (प्रथमा ब.व.)**

एवेदिन्द्रं वृषणं वज्रबाहुं वसिष्ठासो अभ्यर्चन्त्यैर्कै।।[101]

**वशिष्ठान् (द्वितीया ब.व.)**

पाशद्युम्नस्य वायतस्य सोमात्सुतादिन्द्रोऽवृणिता वशिष्ठान्।[102]

**वशिष्ठैः (तृतीया ब.व.)**

नू रोदसी अभिष्टुते वशिष्ठौर्ऋतावानो वरुणो मित्रोः अग्निः।[103]

एषा नेत्री राधसः सुनृतानामुषा उच्छन्ती रिभ्यते वशिष्ठैः।।[104]

**वशिष्ठवत्** –

भद्रमिद्भद्रा कृणवत्सरस्वत्यकवारी चेतति वातिनीवती।
गृणानां जमदग्निवत्सुवाना च वशिष्ठवत्।।[105]

एवाग्निं सहस्यं वशिष्ठो रायस्कामो विश्वप्स्न्यस्य स्तौत्।[106]

नहि वश्चरमं चन् वसिष्ठः परिमंसते।।[107]

श्रुष्टीवेव प्रेषितो वामबोधि प्रति स्तोमैर्जरमाणो वशिष्ठः।।[108]

अयमु ते सरस्वति वशिष्ठो द्वारावृतस्य सुभगेव्यावः।[109]

**वशिष्ठम् (द्वितीया एक.व.)**

ततो हि मान उदियाय मध्याततो जातमृषिमाहुर्वसिष्ठम्।।[110]

उप प्र यातं वरमा वशिष्ठमिमा ब्रह्मण्यृच्यन्ते युवभ्याम्।।[111]

अव राजन्यपशुतृपं न तायुं सृजा वत्सं न दाम्नो वसिष्ठम्।।[112]

वसिष्ठंहु वरुणो नाव्याधद्दषि चकार स्वया महोभिः।।[113]

**वसिष्ठस्य (षष्ठी ए.व.)**

वशिष्ठस्य स्तुवत् इन्द्रो अश्रोदुरुं तृत्सुभ्यो अकृणोदु लोकम्।।[114]

**वसिष्ठः (सम्बन्धबोधनम् ब.व.)**

एवेन्नु कं दशराज्ञे सुदासं प्राबदिन्द्रो ब्रह्मणा वी वशिष्ठाः।।

यच्छक्करोषु वृहता रवेणेन्द्रे शुष्मद्धाता वसिष्ठाः।।

वातस्येव प्रजवो नान्येन स्तोमो वसिष्ठा अन्वेतवे वः।।[115]

**वसिष्ठः (प्रथमा ब.व.)**

नू त्वामग्न ईमहे वसिष्ठा ईशानं सूनो सहस्रो वसूनाम्।।[116]

त्वं वरुण उत मित्रो अग्ने त्वां वर्धन्ति मतिर्भिर्वसिष्ठाः।।[117]

उत्तिष्ठप्वोचे परि बर्हिषो नृन्न मे दूरादवितवे वसिष्ठाः।।

त्रयो धर्मास उषसं सचन्ते सर्वां इत्तां अनु विदुर्वसिष्ठाः।।

**अनेकवशिष्ठा : –**

उपरिनिर्दिष्टानुसारेण महर्षिवसिष्ठोल्लेखः ऋग्वेदात् आरभ्य रामायण– महाभारतपुराणेषु धर्मसम्बन्धिग्रन्थानां सर्वशास्त्रग्रन्थेषु स्वरूपे ऋषेः अनेक विभक्त्यां त्रिविध वचनेषु उल्लेखः प्राप्नोति। वेदेषु मुख्यतया सुदास पैजवानेन सह सम्बन्धितः। अन्यग्रन्थेषु निमि–त्रिशंकु–सगर–दशरथ– ल्याषपाद– संवरणादि अनेकेभ्यः नृपाणां नृपेभ्यः सह सम्बन्धितः, अन्यञ्च तेभ्यः नृपेभ्यः सह अनेक घटनाप्रसङ्गोऽपि वर्णिताः सन्ति।

भिन्न–भिन्न कालखण्डेषु भवितभ्यः नृपेभ्यः सह सङ्कलितमहर्षिवसिष्ठः एकैव वसिष्ठोऽस्ति वा अनेकाः वसिष्ठाः भवन्ति तद्विषये विद्वस्तु विवादः अस्ति। तथा तु अनेकाः वसिष्ठाः भविताः तदा सर्ववसिष्ठेषु संभ्रमोऽपि भवन्ति इति।

एफ ई. पार्जीटर महोदयेन स्वस्यग्रन्थे ( Ancient Indian Historical Tradition) अतीव श्रमेण (The Vasisthas) प्रकरणे अनेकाः वसिष्ठाः दर्शिताः सन्ति।

यार्जीर्टरस्य मतमस्ति यत् वशिष्ठः व्यक्तिगत नाम नास्ति। किन्तु गोत्र नाम अस्ति।[118]

सूर्यवंशे मनुतः आरभ्य भगवानराम तत्पश्चादपि (रामस्योत्तकालिन नृपानामपि ) महर्षिवसिष्ठ पुरोहितरूपेण विद्यमानः अतः वसिष्ठनाम धारयित्वा पौरोहित्यं कृतम्। तान् वसिष्ठान् व्यक्तिगतनामानि अपि सन्ति। यथा–

**देवराजवशिष्ठः –**

देवराजवशिष्ठः अयोध्यायाः त्रैय्यारुण सत्यव्रत–त्रिशंकु हरिश्चन्द्राणां नृपाणां पुरोहितोऽऽसीत। देवराजवशिष्ठस्य प्रसिद्ध त्रिशंकु–शुनः शेषकथायाः शनक सह सम्बद्धोस्ति।

**आपववशिष्ठः –**

एषः वशिष्ठः हिमालयेसमीपे आश्रमे निवसति स्म। अस्याश्रमः अर्जुनकार्तवीर्येण द्वारा दग्धः जातः। तेन कारणेन् महर्षिवसिष्ठेन अर्जुनः

शापितः। 'आयवः' शब्दो वरुणेन सह सम्बन्धितः एषः वसिष्ठः वरुणपुत्रः आसीत्।

**अथर्वनिधि वसिष्ठः –**

एषः वसिष्ठः अयोध्यानरेशबाहुराज्ञः पुरोहितः आसीत्। बाहुराजा हरिश्चन्द्रस्य अष्टमवंशजो आसीत्। अस्य बाहुनृपस्य राज्यं दैत्यानतालजङ्घान बलात् प्राप्तम्। बाहुराजपुत्रेण सगरेण तत्राज्यं पुनः प्राप्तं। दैत्यनृपाणां मित्राणि–शक–हूण–पहुलवा–कम्बोज यवनानां विनाशाय सगरेण तं वसिष्ठं प्रसन्नं कृतम्। तदा तेन वसिष्ठेन तस्य सगरस्य सहायं कृतम्। वसिष्ठस्य अथर्वानिधिश्चपरंनाम् 'आपवः' इति ज्ञायते।

**श्रेष्ठभाजवसिष्ठः –**

एषः चतुर्थवसिष्ठः राजाकल्पाद –सौदासयोः पुरोहितः आसीत्। अश्मकः कल्याणायपादस्य राज्ञीमह्यन्तिकां वशिष्ठेन नियोजनेन नाम्नः पुत्रः प्राप्तः कृतः। एवं वसिष्ठं ब्रह्मकोशोऽपि कथ्यते।

**अर्थनिधिवसिष्ठाः –**

एषः वसिष्ठः महाराजदिलीपखट्वा›स्य च पुरोहित बभूव। महाकवि कालिदास्य रघुवंशे प्रथमसर्गे वसिष्ठस्य प्रस›ा प्राप्नुवन्ति।

**षष्ठः वसिष्ठः –**

एषः वशिष्ठो–अयोध्यानेरशराजादशरथस्य पुत्रस्य रामस्य पुरोहितः अभवत। महर्षिवाल्मीकिकृत रामायणे तस्योल्लेखः प्राप्यते।

**सप्तमवसिष्ठः –**

मैत्रावरुणः वा मैत्रावारुणि। एषः वशिष्ठः दक्षिणपाञ्जावालस्य नृप पैजवानसुदासस्य पुरोहितः आसीत। एवं वशिष्ठं सप्तममण्डलस्य दर्शनं कृतम्। यस्योल्लेखः ऋग्वेदादिग्रन्थेषु प्राप्नोति।

**शक्तिवशिष्ठः एवं सुवर्चसवशिष्ठः –**

तौ द्वयौ मैत्रावरुणवशिष्ठस्य पुत्रौ जातौ। वशिष्ठसुर्वचस् स हस्तिनापुरनरेशसंवरणस्य समकालिकश्च पुरोहितः आसीत्।

**पराशरवशिष्ठः –**

एषः वशिष्ठः शक्तिपुत्रोऽभवत। हस्तिनापुरराजाशान्तनुश्च तस्य पुत्र भीष्मयोःसमकालिको एवं अन्यञ्च कृष्णद्वैपायनव्यासस्य जनकपराशरः एवं सुदास पौजवानस्य समकालिकपराशरः द्वयोः एकैवमिति शक्यं नास्ति।

**वशिष्ठः –**

रन्तिदेवश्च सांकृत्यो वशिष्ठाय महात्मने।
अर्घ्यं प्रदाय विधिवल्लेभे लोकाननुतमान्।।[119]

तथा तु मुच्चकुन्दस्य पुरोहित रन्तिदेवेन द्वारा सम्मानितवशिष्ठः सातहव्यवशिष्ठः चैकितानेयवशिष्ठ वैऽवशिष्ठः युक्तावशिष्ठाादि अनेकाः वशिष्ठाः प्रकम्पिता। वशिष्ठः हस्तिनापुरस्य 'हस्तिन' राज्ञा समकालीन आसीत्।

**वशिष्ठ, धर्मशास्त्रप्रकारः –**

वशिष्ठस्मृति नामक धर्मशास्त्रविषयकग्रन्थस्य कर्ता रूपेण ज्ञायते।

महर्षिवशिष्ठस्य जन्मवृतान्तम् :–

महर्षे प्रथमः जन्मं सृष्ट्यारम्भे ब्रह्ममानसपुत्ररूपेणऽभवत्।

**यथा महाभारते –**

मरीचिरङ्गिराश्चात्रिः पुलस्त्यः पुलहुः क्रतुः।
वशिष्ठश्च महातम्वै मनुः स्वायम्भुवस्तथा।।[120]

तत्रैव –

मरीचिरङ्गिराश्चाात्रि पुलस्त्य प्रलुहः क्रतुः।
वशिष्ठ इति सप्तैते मानसा निर्मिताहिते।।[121]

**यथा विष्णुपुराणे –**

यदास्य ताः प्रजाः सर्वा न व्यवर्धन्त धीमताः।
अथान्यान्मानसान्पुत्रान्सदृशानात्मनोऽसृजत्।।
भृगुं पुलस्त्ये प्रलंह क्रर्तुमङ्गिरसं तथा।
मरीचि दक्षमत्रिं च वशिष्ठं चैव मानसम्।।[122]

**कूर्मे, च लिङ्गपुराणे –**

मरीचिभृग्वङ्गिरसः पुलस्त्यं पुलहं क्रतुम्।
दक्षमत्रिं वशिष्ठश्च सोऽसृप्तद्योगविद्यया ।[123]

**मत्स्यपुराणे –**

दक्षं मरीचिमत्रिं च पुलस्त्यं पुलहं क्रतुम्।
वशिष्ठं गौतमं चैव भृगुमङ्गिरसं मनुम्।।
अथैवाद्भुतमित्येते ज्ञेयाः पैतामहर्षयः ।[124]

**मत्स्ये –**

मरीचिरभवत् पूर्वं तत्राऽपिभगवाननृषिः।
अङ्गिराश्चभवत् पश्चात् पुलस्त्यस्तदन्तरम्।।
ततः पुलहुनामा वै ततः क्रतुरजायत्।
प्रचेताश्च ततः पुत्रो वशिष्ठाश्चाभवत् पुनः।।
पुत्रो भृगुरभूत् तद्वन्नारदोऽप्यचिराद्भूत्।
दशेमान् मानसन् ब्रह्मा मुनीन पुत्रान् जीवनम्।।

**कूर्मपुराणे –**

प्राणाद् ब्रह्मासृजद् दक्षं चक्षुषश्चमरीचिम्।
शिरसोऽङ्गिरसं देवो हृद्याद भृगुमेव च।।
श्रोत्राभ्यामत्रिनामानं धर्मं च वसायतः।
संकंल्पं चैव संकल्प्यात् सर्वलोकपितामहः।।
पुलस्त्यं च तयोदानाद् ज्यानाचचपुलहुमुनिम्।
अपानात् क्रतुम्व्यग्रं समानाच्य वशिष्ठम्।।
इत्येते ब्रह्मणा सृप्टाः साधका गृहमेधिनः ।[126]

ब्रह्मणः सप्त वै पुत्रा महात्मानः स्वयम्भुवः।
मरीचित्र्यङ्गिरसौ पुलस्त्य पुलहः क्रतुः।।
वशिष्ठश्च महाभागः सदृशो वै स्वयम्भुवा।।[127]

**शिवपुराणे –**

मरचिं च स्वनेत्राभ्यां हृद्याद् भृगुमेव च।
शिरसोऽरिसं व्यानात्पुलंघ मुनिसत्तम्।।
उदनाच्च पुलस्त्यं हि वशिष्ठं च समानतः।
क्रतुंत्वयानाच्छ्रोत्राभ्यमत्रि दक्षं च प्राणतः।।
असृजं त्वां तदोत्संगाच्छायायाः कर्दमंमुनिम्।
संकल्पादसृजं धर्मं सर्वसाधनसाधनम्।।
एवमेतानहं सृष्ट्वा कृतार्थः साधकोतमान्।।[128]

**देवीभागवते–**

मरचिर्नारदोऽत्रिश्च पुलस्त्यंः पुलहः क्रतुः।
दक्षो वशिष्ठ इत्येते ब्रह्मणः प्रथिता सुताः।।[129]

**अग्निपुराणे –**

मरीचित्र्यऽरिसौ पुलस्त्यः पुलहः क्रतुः।
महातेजाः सोऽसृजत् स्वयमभुवा।।[130]
वशिष्ठं च महातेजाः सोऽसृजत सप्तमानसम्।।[131]

**महाभारते –**

ब्रह्मानुससृजे प्रत्रान् मानसान् दक्षसप्तमान्।
मरीचिमत्र्यऽरिसं पुलस्त्यं पुलहं क्रतुम्।।[132]

तत्रैव –

ब्रह्मणो मानसाः पुत्रा विदिताः षण्महर्षयः।
मरीचित्र्यऽरिसौ पुत्रस्त्यः पुलहुः क्रतुः।।[133]

अत्र षड्शक्तिशालीमहर्षिन् त्यक्त्वा सर्वत्र महर्षिवश्सिष्ठस्योल्लेखः अस्ति। एवं शान्तिपर्वस्यनामावल्यां सप्तमानसपुत्रेषु वशिष्ठगणानां न कृता वशिष्ठस्य स्थाने दक्षनाम् स्थापितम्।

**महर्षिवशिष्ठस्य द्वितीयजन्मम् –**

महर्षिवशिष्ठस्य प्रथमजन्मो सृष्ट्यारम्भे ब्रह्मणा जातः। किन्तु दक्षयज्ञसमये शिवापमानकारणेन वीरभद्रेण द्वारा अन्यभिः ऋषिभिः सह महर्षिवशिष्ठमपि दग्धो कृतः। यदा शिवशापात् ऋषिभिः स्वशरीराणि त्यक्तानि तथा तु पुनः ब्रह्मणा द्वारा अग्नेः उत्पन्ना जाता। यथा –

महादेवस्य शापेन त्यक्त्वा देहं स्वयं तथा।
ऋषयश्च समुद्भुता हुते शुक्रे महात्मना।।
ततो जातो महातेजा भृगुश्च तपसां निधिः।
अ›रेष्वा›रा जातो ह्यर्चिभ्योऽत्रिस्तथैव च।।
मरीचिभ्यो मरीचिस्तु ततो जातो महातपाः।
केशैस्तु कपिशो जातः पुलस्त्यश्च महातपाः।।
केशैः प्रकल्भैः पुलहस्ततो जातो महातपाः।
वसुमध्यात् समुत्पन्नो वशिष्ठस्तु तपोघनः।।[134]

## सन्दर्भिका

## 1.महर्षिवशिष्ठस्य संस्कृतवा›मये महत्वंवैशिष्ट्यमञ्च


1. अनु.दानद्यमपर्व –78/2/1–6
2. लिंगपुराण–32/6/1–2
3. महाभारत–शान्तिपर्व –302/8/1–2
4. महाभारत–शान्तिपर्व –302/9
5. पुराणविमर्श–पृ.40
6. पुराणविमर्श–पृ.–40
7. मार्कण्डेयपुराण–अध्याया–45
8. सन्त्सुजातीय 2/12
9. अयं श्लोकद्वयौ वर्तमान् पुराणेऽपि उपलब्धौ यथा–आचार्यस्योपरोक्तकथनस्य परीक्षणं दर्शयति यत् आचार्यशङ्करः ऋषिमुनि द्विसकारकौ इति मन्यते। – आचार्य बलदेव उपाध्याय–पुराणविमर्श।
10. प्रत्यस्तमितभेदं यत्सत्तामात्रमगोपरम्।
    वचसमात्संवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम्।।
    तच्च विष्णोः परं रुपमरूपारव्यमुनित्तुमम्।
    विश्वस्वरूपवैरुप्यलक्षणं परमात्मनः।। 7 वि.पुराण–7/53–54
11. महाभारत–शान्तिपर्व–79/3–4
12. महाभारत–शान्तिपर्व–7/4–5
13. पुराणविमर्श–4/122
14. पुराणविमर्श–4/40–41
15. शंखस्मृति–7/6
16. महाभारत–वनपर्व–12/11–16
17. रामायण–अयोध्याकाण्ड–67/23
18. नीलकण्ठी महाभारत वनपर्व–12/11

19. गीता–2 / 56
20. नैषधचरितम् – 1 / 132
21. पुराणविमर्शः–आ. बलदेव उपाध्याय
22. रामायणे बालकाण्डे–63 / 2
23. सर्वानुकमणी
24. ऐतरेयाण्यके–2 / 9, शतपथब्राह्मणे–6 / 1 / 1 / 1
25. निरुक्ते–1 / 20
26. निरुक्ते
27. निरुक्ते–2 / 22
28. निरुक्ते–2 / 12
29. वैदिक साहित्य औ2 संस्कृति–बलदेव उपाध्याय, पृ.–11
30. वैदिक साहित्य औ2 संस्कृति–बलदेव उपाध्याय, पृ.–11
31. लि›पुराणे–70 / 97
32. ब्रह्मपुराणे–1 / 32 / 87
33. वायुपुराणे'59 / 79
34. मत्स्यपुराणे–145 / 81–83
35. आचार्य सायण–सायणभाष्य–ऋग्वेद–1 / 1
36. चरकसंहिता–सूत्रस्थानं–3 / 11
37. 2 / 1 / 61
38. पु.वि.–41
39. सेश्वराः स्वयमुद्धता तां ब्रह्मणो मानसाः सुताः।
 नि वर्तमानैस्तैबुद्धया महान् परिगतः यशः।।
 यस्मादृषिर्महुत्वेन ज्ञेयास्तस्मान्नहर्षयः।
 ईश्वराणां सुतास्तेषां मानसाश्चौरसाश्च वै।।

मत्स्य–145 / 84 / 1

40. ऋषिस्तस्मात् परत्वेन भूतादिऋषयस्ततः ।
41. ऋषिपुत्राः ऋषिकस्तु मैथुनाद् गर्भसंभवाः।। मत्स्य–145–6
 परत्वेन ऋषयन्ते वै भूतादीनि ऋषिकास्ततः।

ऋषीकाणां सुता ये तु विज्ञेयो ऋषिपुत्रकाः।।

मत्स्य–145/1/87

42. श्रुत्वा ऋषं परत्वेन श्रुतास्तस्याच्छ्रुतर्षयः। मत्स्य–145/1/87

43. विष्णुपराण–3/6/30

44. भृगुर्मरीचिविचित्रश्च अंगिरा पुलस्तु क्रतुः।
मनुर्दक्षो वसिष्ठश्च पुलस्त्यश्चापि ते दशः।।
ब्रह्मणो मानसा ह्येते उत्पन्नाः स्वयमीश्वराः।
प्रवर्ततेनर्षरूो यस्मान्मतास्मान्नमहर्षयः।।
ईश्वराणां सुतास्त्वेषामृषयस्तान् निबोधत्।
काव्यो बृहस्पतिश्चैव कश्यपश्च्यवनस्तथा।।
उत्थ्यो वामदेवश्च अगस्त्यः कौशिकस्तथा।
कर्दमो बालखिल्याश्च विश्रवा शक्तिवर्धनः।।
इत्येते ऋषयः प्रोक्तस्तपसा ऋषितो गताः।
तेषां पुत्रानृषीकांस्तु गर्भोत्पन्नान् निबोधत।।
वत्सरो नग्ननहुश्चैव भरद्वाज वीर्यवान्।
ऋषिर्दधितमाश्चैव बृहाकक्षाः शरङ्कतः।।
वाजिश्रवाः सुचिन्तश्च शावश्चसपराशरः।
श्रृ›h च शङ्ख्याच्चैव राजावैश्रवणस्तथा।।
इत्येते ऋषिकाः सर्वे सत्येन ऋषितां गताः।
ईश्वरा ऋषयश्चैव ऋषिका ये च विश्रुताः।।

मत्स्यपुराणे–145/90–97/ वायुपुराणे–अध्याय–59

45. महाभारते–अनु./93/84

46. महाभारते–आदि.173/5–6

47. ऋग्वेद–आ. सायणेन – 2/9 , एवं 10/95/17

48. शब्दचन्द्रिका

49. आचार्यहेमचन्द्रः

50. भागवते–11/15/16

51. षड्तन्त्रे

52. अमरटीकायां
53. रत्नावली
54. अमरटीकायाः
55. अमरटीकायाः
56. वैद्यकररत्नामाला
57. शब्दचन्द्रिका
58. पाणिनीसूत्र–5/3/65
59. हेमचन्द्राचार्य
60. ऋग्वेदे सप्तममण्डले–पृ.–65, प्रस्तावना–डॉ. वसतभट्ट
61. सुदासेन वसिष्टाय धनं उत्तमं दत्तम्। यस्यास्योल्लेखःजातः।

द्वे नप्तुर्देवतः शते गोर्द्वा रथा वधुमन्ता सुदासः।
अर्हन्नग्ने यौजवनस्य दानं होतेव सद्म पयेर्मि रेमण।।
चत्वारो मा यैजवनस्य दानाः स्मद्धियः कृशिनिनो विरेके।
ऋजुजास्रो मा प्राथिविष्ठाः सुदासस्तोकं तोकाय श्रवसे वहन्ति।

ऋग्वेद–7/14/22–23

62. ऋग्वेदे–7/33/1
63. ऋग्वेदे– 83/8
64. लिङ्गपुराणे–32/6
65. महाभारेत–अनु.93/84
66. वशिष्ठऋषि नु दर्शन–डॉ.ए.डी.शास्त्री–पृ.21
67. मा नो अग्नेऽवीरते परा दा दुर्वाससेऽमतये मा नो अस्यै।

ऋग्वेदे–7/1/19 ,

68. ऋग्वेद–7/1/8
69. वशिष्ठऋषिनुं दर्शन–पृ.24, डॉ. अ.दे.शास्त्री
70. ऐतरेयब्राह्मण–1/28
71. ऐतरेय आरण्यक–2/2/2
72. शतपथब्राह्मण–8/1/1/6
73. बृहद्देवतायां–5/156
74. अथर्ववेदे सायणभाष्ये–6/41/2

75. अथर्ववेदे सायणभाष्ये–6/44/2

76. अथर्ववेदे सायणभाष्ये–6/111/2

77. अथर्ववेदे सायणभाष्ये–7/55/2

78. वशिष्ठऋषि नुं दर्शन–पृ.21

79. वशिष्ठश्च वशिष्ठाश्च ब्राह्मणा ब्राह्मकर्मणि।
सर्वकर्मसु यज्ञेषु दक्षिणीयतस्तथा।।
तस्माद्येद्यापि वशिठाः सदस्याः स्युस्तु कानिचित्।।
अर्हुयेदक्षिणाभिस्तान् भाल्लयेवी श्रुतिस्तिवयम्।। –बृ.दे.–5/158/9

80. द्वे नप्तुर्देववतः शते गोर्द्वा रथा वधूमन्ता सुदासः।
अर्द्धन्नग्ने यैजवनस्य दानं होतेव सद्म पर्येमि रेभन्।।
चत्वारो मा यैजवनस्य दानाः स्मृद्धिटयेः कृशमिनो निरेके।
ऋज्नासो मा पृथिविष्ठाः सुदासस्तोकं लोकाय श्रवसे वहन्ति।।
ऋ.7/18/22–23

81. वशिष्ठ ऋषिनुं दर्शन–पृ.26, डॉ. अ.देव शास्त्री, ऋग्वेदे–7/1/18

82. वशिष्ठ संबोधनम्

83. ऋग्वेदे–7/1/8

84. ऋग्वेदे–7/96/1

85. ऋग्वेदे–7/88/1

86. ऋग्वेदे–7/9/6

87. ऋग्वेदे–7/22/3

88. ऋग्वेदे–7/22/5

89. ऋग्वेदे–7/18/4

90. ऋग्वेदे–7/18/21

91. ऋग्वेदे–7/33/6

92. ऋग्वेदे–7/33/12

93. ऋग्वेदे–7/33/14

94. ऋग्वेदे–33/1/7/9

95. ऋग्वेदे–7/37/4

96. ऋग्वेदे–7/76/6

97. ऋग्वेदे–7 / 77 / 6

98. ऋग्वेदे–7 / 80 / 1

99. ऋग्वेदे–7 / 90 / 7

100.ऋग्वेदे–10 / 15 / 8

101.ऋग्वेदे–7 / 23 / 6

102. ऋग्वेदे–7 / 23 / 2

103. ऋग्वेदे–7 / 39 / 7

104. ऋग्वेदे–7 / 86 / 7

105. ऋग्वेदे–7 / 76 / 3

106. ऋग्वेदे–7 / 42 / 6

107. ऋग्वेदे–7 / 59 / 3

108. ऋग्वेदे–7 / 59 / 3

109. ऋग्वेदे–7 / 95 / 6

110. ऋग्वेदे–7 / 33 / 13

111. ऋग्वेदे–7 / 70 / 6

112. ऋग्वेदे–7 / 86 / 5

113. ऋग्वेदे–7 / 88 / 4

114. ऋग्वेदे–7 / 33 / 5

115. ऋग्वेदे–7 / 33 / 3,4,8

116. ऋग्वेदे–7 / 7 / 7

117. ऋग्वेदे–7 / 12 / 3

118- The henbit refer to them only by their -- vanishes -, page-204

119. म. अनु. 136 / 6

120. महाभारते / शान्तिपर्वे–340 / 34

121. महाभारते / शान्तिपर्वे–340 / 69

122. विष्णुपुराणे–प्रथमांशे–7 / 4 / 5

123. लि›पुराणे–पूर्वभागे–5 / 10, कूर्मपुराणे–7 / 33

124. मत्स्यपुराणे–171 / 27–28

125. मत्स्यपुराणे–3/6–7
126. कूर्मपुराणे–7/35–36–37
127. म.शा–.208/3/1
128. शिवमहापुराणे, रुद्रसंहितायां–1/16/4–6
129. हे.मा.–3/13/12
130. अग्निपुराणे–18/16
131. अग्निपुराणे–18/16, हरवंशे–1/41
132. महाभारते– शान्तिपर्वे–207/17
133. महाभारते– आदिपर्वे–65/10
134. मत्स्यपुराणे–195/6–8–10–11

## 2.महर्षिवशिष्ठस्य ग्रन्थानां विवेचनम्

अखिलब्रह्माण्डेमानवजीवनोप्रकारञ्च प्रभावकं देवत्वं विकसितम्। प्रकृत्याः कोऽपि तत्वे–पदार्थे एव देवतत्वं सीमितं नास्ति। अतः महर्षिवशिष्ठो यत्र देवतत्वस्य दर्शनं कृतं यदा–यदा देवतत्वस्य दर्शनं कृतं तत्र–तत्र, तद–तदा तेषां सर्वानां स्तुत्यः कृतवन्तः। अन्यकोऽपि ऋषेः तुलनायां वशिष्ठैव अधिकसंख्यायां सम्भवतः 36 देवतायाः स्तुत्यः कृताः। सूक्तपञ्चत्रिंशते 70 नामानि सन्ति। तेनाधारेण वशिष्ठस्य दृष्टिः अस्ति। देवतायां कल्पनाउपरान्तं सर्वत्र दैवीतत्वस्यदर्शनीया दृष्टिः अस्ति। तेषां भावपदार्थापि सन्ति–तत्र गावोऽश्वोऽपि विद्यमानाः। जगति कोऽपि दृश्ये वा चिन्तने आगच्छति, तस्य पृष्ठभूमिकायां दैवीशक्त्यै कारणभूतार्थमिव अभिमानिदेवतायां विचारः पश्चात् स्फूरितः। तस्य मूलकारणं सप्तमण्डलैव दृश्यते। अन्यञ्च वशिष्ठेन भिन्न–भिन्न देवानां स्तुतयः कृताः। तथापि प्रत्येक स्तुत्याः कतृत्वं काले कृताः। सूक्तदेवता एव मुख्यदेवतास्ति तथैव तस्यवृत्तिः भवति। वशिष्ठमण्डले अनेकदेवतावादस्य भूमिका लङ्घयित्वा एषः इष्टदेवस्य भूमिकायां सुष्ठु अग्रे गमनायमनोवृत्तिं पश्यामः। अनेकदेवतावादात् एकदेवतावादे विकसिता एषा अन्तरालभूमिका इति।[1]

ऋग्वेदस्य पारिवारिकमण्डलेषु सप्तमंमण्डलं ऋषिवशिष्ठः अस्ति। महर्षिकात्याययेन लिखितं यत्–'' सप्तममण्डलं वशिष्ठोऽपश्यत्।''।[2] सप्तमण्डले सर्वमिलित्वा 104 सूक्तानि सन्ति।

तेषु 1 तः 31, 34 तः 100 एवं 103 तः 104 सूक्तानि सम्पूर्णरूपेण महर्षिवशिष्ठस्य एव सन्ति। द्वत्रिंशतसूक्तस्य 27 ऋचासु 1 तः 25 एवं 27 ऋचानां ऋषिः महर्षिवशिष्ठोऽस्मि। 26 ऋचायाः प्रथमपंक्ति वशिष्ठपुत्रशक्तेः अस्ति। किञ्च द्वितीयापंक्तिः महर्षिवशिष्ठस्य एव अस्ति। 33 सूक्ते ऋचा 9 पर्यन्तं वशिष्ठोपश्यत। तत्रैव ऋचा 10 तः 14 पर्यन्त वशिष्ठपुत्राणां दर्शनम्। किन्तु तत्र वशिष्ठपुत्राणां नामानि न दत्तानि। 101 एवं 102 सूक्ते त्रिषु महर्षिवशिष्ठः वा कुमाराग्नेयोऽस्ति। अथ

सप्तममण्डले सूक्तद्वयस्य महर्षिवशिष्ठस्य ऋषित्वं संहितामस्ति। एवमेव ऋग्वेदे सप्तममण्डले अखण्डसूक्तशतकानि पञ्चत्रिंशति ऋचायाः मध्ये सार्धऋचां महर्षिवशिष्ठोऽपश्यत।

ऋग्वेदे सर्वानुक्रमण्यां अन्यमण्डलेषु नवम मण्डलान्तर्गतं सप्तपंचदश सूक्तस्य प्रणयनश्रेयोऽपि वशिष्ठस्य वशिष्ठपुत्रान् तस्यवंशजानाना दीयते। अस्यानुसारेण अस्य सूक्तस्य अधोत्रीणिऋचानां प्रणयनं स्वयं वशिष्ठेन कृतम्। अन्यञ्च चतसृभ्यः ऋषयः त्रिंशतपर्यन्तं ऋचानां प्रणयनं वशिष्ठकुलात्पन्ननिम्नाङ्कित नववशिष्ठाः कृता। तद्यथा –

| **ऋषिः** | **ऋचा संख्या** |
|---|---|
| इन्द्र–प्रमति | 4–6 |
| वृषगणः | 7–9 |
| मन्युः | 10–12 |
| उपमन्युः | 13–15 |
| व्याघ्रपादः | 16–18 |
| शृक्तिः | 19–21 |
| वर्णश्रुतः | 22–23 |
| मृलीकः | 25–27 |
| वसुक | 28–30 |
| पराशरशाक्त्यः | 31–44 |

अस्मिन् सूक्ते 31–44 ऋचानां रचना पराशरशाकत्येन कृता। पराशरस्यकृते विद्वत्सु जनेषु मध्ये मतभेदः वर्तते। यथा – सः पराशरः स्वयं वशिष्ठस्य पुत्रशक्तेः पुत्र पराशरः इति। अन्यञ्च पार्जिहर महोदया अन्तिमऋचायाः रचना वशिष्ठकुलोत्पन्नपरासरेण न अपितु शान्तनुराज्ञः समाकलिकोऽपि अन्यपराशरेण कृतः इति।[3]

ऋग्वेदापरान्तं सामवेद–वाजसनेयीसंहिता–अथर्ववेदेषु वशिष्ठदृष्टाः मन्त्राः अधिकमात्रायां उपलब्धाः। तेषां अधिकमन्त्राः ऋग्वेदेऽपि संकलिता।[4]

ऋग्वेदस्य सप्तममण्डले 104 सूक्तेषु अनेकानां देवानां स्तुतयः संग्रहीताः सन्ति। तद्यथा –

| क्रम | देवानां नामानि | सूक्तसंख्या |
|---|---|---|
| 1 | अग्नि | 17 |
| 2 | इन्द्र | 16 |
| 3 | विश्वदेवाः | 6 |
| 4 | सविता | 1 |
| 5 | रुद्रदेवता | 2 |
| 6 | ऋषभदेवानां | 1 |
| 7 | आपः | 1 |
| 8 | नदी | 1 |
| 9 | आदित्यः | 2 |
| 10 | वारतोष्पत्तिः | 2 |
| 11 | मरुत | 4 |
| 12 | सूर्यः | 1 |
| 13 | अश्विनदेवयोः | 8 |
| 14 | उषा | 7 |
| 15 | पर्जन्यः | 2 |
| 16 | विष्णुः | 2 |
| 17 | वृहस्पतिः | 1 |
| 18 | सरस्वती | 2 |
| 19 | वायुः | 3 |
| 20 | अर्यमा | 1 |
| 21 | भृगदेवस्य | 1 |
| 22 | वरुणदेवस्य | 4 |

| | | |
|---|---|---|
| 23 | मण्डूकः | 1 |
| 24 | रक्षोधन | 1 |
| 25 | सोमदेवस्य | 2 |

**द्वन्द्वदेवयोः –**

| **क्रम** | **देवानां नामानि** | **सूक्तसंख्या** |
|---|---|---|
| 1 | पृथ्वी–अन्तरिक्षयोः | 1 |
| 2 | मित्रावरुणयोः | 6 |
| 3 | द्यावापृथिव्योः | 1 |
| 4 | इन्द्रवायव्योः | 3 |
| 5 | इन्द्राग्नौः | 2 |
| 6 | इन्द्रविष्णुः | 1 |
| 7 | इन्द्रवरुर्णो | 4 |

वशिष्ठमण्डले सर्वं मिलित्वा 841 मन्त्राः सन्ति।

वास्तोष्पत्तिः इत्युक्ते गृहस्याधिष्ठाता देवः। तस्य स्तुतिः अत्र सप्तमण्डलैव प्राप्नोति। अन्यकुत्रोऽपि नास्ति। वशिष्ठमण्डले नानादेवानां षड्त्रिंशतस्तुत्यः महर्षिवशिष्ठोऽकरोत। इत्थं सर्वदेवानां एकेन सह एतेषां सुतयः अन्यकोऽपि ऋषिं न अकरोत।

**वशिष्ठ धर्मसूत्रम् :–**

महर्षिवशिष्ठः असमाकं स्मृतिकारेषु एकान्त उच्चस्थाने प्रतिष्ठितधर्मसूत्रकारोऽस्ति। यस्य धर्मसूत्रं मात्रायां स्वल्पकायं तथापि गुणानां महनीयं च विपुलम्–30 अध्यायेषु विभक्तेषु सूत्रेषु मुख्यतया सूत्रेषुरचितम्। क्वचित् श्लोकाऽपि रचिता। आचार–व्यवहार–प्रायश्चित त्रयस्मृतिविषयानां वर्णने ग्रन्थं पूर्णश्च पुष्टं सिद्धयति।

वै.,सां.सं–आचार्य बलदव उपाध्याय

कुमारिलभट्टः तन्त्रावार्तिके वशिष्ठधर्मसूत्रस्य सम्बन्धोऋग्वेदे सह दर्शयति। मूलधर्मसूत्रं कालान्तरेण परिवृहिंत परिवर्धितपरिवर्तितानि भवितानि स्म। यत् हस्तलेखेषु अध्यायायानां संख्या न्यूनाधिक सन्ति। कुत्रचित् 6 कुत्राचित् 30 अध्यायानां भिन्न–भिन्न हस्तप्रतिषु प्राप्ता। भिन्न–भिन्न अध्यायानां संख्या तस्य मेलनं परिवृहणस्य परिचायकम् इति।

गौतमधर्मसूत्रेण सह अस्यग्रनथस्य विशेषसम्बनधं लक्षितम्। वशिष्ठधर्मसूत्रस्य 30 अध्याये एवं गौतमधर्मसूत्रस्य 19 अध्याययोः अक्षरशः साम्यमस्ति। अन्यत्रेऽपि द्वयोः धर्मसूत्रयोः शब्दार्थभ्याम् समानतायाः अभावं न, प्रमाणस्याभावात् इमं निर्णयं न कर्तुं शक्नुवन्तु यत् कः कस्मात् उद्धृत्यति? वशिष्ठः गौतमात् ? वा गौतमः वशिष्ठात् ? आचार्यबलदेवउपाध्यायेन लिखितं यत्– ''सम्भवतः एते द्वै श्रद्धेयधर्मशास्त्रे तयोः युगस्य कृति स्तः। तस्मिनयुगे आदान–प्रदानं माननीयम् इति।[11]

तत्र धर्मसूत्रे उपनयन–अनध्याय–स्नातकनियम पञ्चमहायज्ञानां आदिनां सांख्यानगृह्यसूत्रेण सह घनिष्ठसम्बन्धः दृश्यते। आरम्भे चतुर्दशाध्यायेषु[12] आचारस्य मध्ये पञ्चाध्यायेषु[13] व्यवहारसूत्रेषु अन्तैकादशाध्यायेषु[14] प्रायश्चित्तस्य साङ्गोपाङ्गवर्णनं ग्रन्थोपादेयतायाः प्रतिमादयति। अन्यधर्माचर्यानां सहशः वशिष्ठस्योऽपि पूर्णाग्रहः एव अस्ति। आचारेदेव व्यक्तिश्च समाजं मान्यता–दीर्घजीवनं सत्काराणां प्राप्तं कारयति।[15] शास्त्राभ्यास विद्यार्जनं विज्ञानोपार्जनानि अवश्यमेव काम्यञ्च उपादेयवस्तूनि सन्ति, किन्तु व्यवहारे विना प्रयोगेन अर्थात् आचाररूपे परिणतेनविना केवलभारमात्रैव इति। यथा –

आचारः परमोधर्मः सर्वेषामिति निश्चयः।
हीनाचारपरीतात्मा प्रेत्य चेह च नश्यति।।[16]

अत्रैव चत्वाराश्रमानां स्नातकस्यश्च गृहस्य नियमानां विशदं तथा सा›ोपा›विवेचनं सरलीकृतम्। 13 अध्याये श्रावणीकर्मं 14 अध्याये

भक्ष्याभक्षयोः निर्णयोऽपि तत्कालीनसमाजस्य रूपरेखायाः ज्ञानार्थे नितान्तसहायकः इति। 17 अध्याये नानापुत्राणां लक्षणं एवं तुलनात्मकमहत्वं वर्णितम् अस्ति। ग्रन्थेऽस्मिन् महर्षिवशिष्ठस्य कतिपयस्वतन्त्रमताः वशिष्ठेन कल्पिताः यत् प्राचीनस्मृतिग्रन्थेषु न उपलब्धाः। यथा –

1. शूद्र–ब्राह्मणविवाहस्य निषेधः।
2. दत्तकविधानम्।
3. व्यवहारप्रसङ्गेषु लेखस्योऽपि साक्ष्ये उपयोगः।

इत्यादयाः महत्वपूर्णमताः वशिष्ठस्य स्वयंचिन्तनफलिताः।

अन्तिमाध्यायेषु प्रायश्चित्तावसरे अनेकवैदिकमन्त्राणां जयविधानञ्च तेन यज्ञ द्वारा यजनकार्यस्य विशेषविधानं कृतम्। आचार्य उपाध्यायानुसारेण अन्तिमाध्यायः समग्रधर्मशास्त्रस्य कुञ्चिका अस्ति। धर्ममहिमायाः प्रशस्ति अस्ति।[19]

सर्वभारतीयस्मृतिकाराणां स्वरं मेलयित्वा वशिष्ठः एषा उच्चघोषा कृता।

धर्मं चरत् माऽधर्मं सत्यं वदत् माऽनृतम्।
दीर्घं पश्यत् मा हर्स्वं परं पश्यत् माऽपश्म्।।[20]

महर्षिवशिष्ठः आर्यसभ्यतायाः उन्नायाकमहर्षिषु अन्यतमः। अतएव यूनानीसभ्यातायाः परिचिता भूत्वाऽपि वशिष्ठो आर्यभाषायाः पठन–पठनस्योपदेशः दीयते अन्यञ्च म्लेच्छाभाषायाः निषेधः कृता यथा न म्लेछा भाषां शिक्षेत्।[21]

संक्षेपतः वशिष्ठस्य जीवनदर्शनं नितान्तं उदातं एकान्तकर्मनिष्ठश्च पूर्णतः आध्यात्मिकमस्ति। महर्षिवशिष्ठः अस्माकं स्वस्य शिष्टञ्च संस्कृतभारतीयाः भूत्वा जीवनयापनस्य उपदिशति। राजा तथा पुरोहितयोः आनुकूल्यः एकात्यश्च राष्ट्रसमृद्धयाः मुख्यकारणमस्ति। भारतीय –राजनीतिसिद्धान्तानुसारेण राष्ट्रस्य परिचालने छात्रतेजेन सह ब्रह्मवर्चस्व

पूर्णसहयोगातैव राष्ट्रदेश द्वयोः समृद्धिं नोचितं भवति। महर्षिवशिष्ठेन् ब्राह्मग्रन्थात् बहुमूल्य उद्धरणं दत्तम् यथा –

''ब्रह्मपुरोहितं राष्ट्रमृदघ्नोनीति।'' [22]

ऋग्वेदे 'दासराज्ञयुद्धे' इन्द्रसूक्तेऽपि महर्षिवशिष्ठस्य इन्द्रस्तुति–कारणेन सुदासः विनयवान् भवति। [23]

महाकवि कालिदासोऽपि अग्नियवनयोः दृष्टान्तेण इदं राष्ट्रभावनां अनुमोदिता।

स बभूव दुरासदः परैर्गुरुकुलकल्याणाय कृत क्रियः।
यवनाग्निसमागमो क्षयं सहितं ब्रह्म यदस्त्रतेजसा।।[24]

दण्डात् दण्डितापराधी स्वस्य पापात् मुक्त्वा निर्मलं भवति तथा पुण्यात्मासदृशः स्वर्गे जायते।[25] अन्यथा तत्पापं नृपं गृह्णाति। अतः स्वस्य समाजस्य अपराधे च कल्याणाय अपराधी दण्उ राज्ञः मुख्यकर्तव्य भवतीति।

अत्र अन्तरंग–बहिरंगप्रभावयोः आधारेण वशिष्ठधर्मसूत्रस्य समयः विक्रमपूर्व तृतीय शतके निर्धारितः तस्मिन्काले भारतीयाः यूनानमानवानां सभ्यता भाषाश्च रीतिपरम्परा प्रथमपरिचितः भवितास्म।[25]

महामहोपाध्यायः–भारतरत्न पी.पी.काणे महोदयानुसारेण ईसा.पूर्व 300 तः 100 मध्ये सूत्रस्यसमयं निर्धारितमं कृतम्।[26]

**वशिष्ठस्मृतिः –**

त्रिंशत् अध्यायसमन्वितमं वशिष्ठस्मृतिः नाम्नः ग्रन्थाः समृतिसमुच्चये प्राप्तः। अस्मिन् ग्रन्थे आचार–प्रायश्चित्त संस्कार–रजस्वला–संन्यासी–आततायिनामादिनां नियमाः दर्शिताः। तथैव दत्तकप्रकरण–साक्षिप्रकरणं–प्रायश्चित्तप्रकरणानां विषयानां विवेचनं कृतम् इति [27]

मन्वत्रिविष्णुहारितचारावन्नचोशनोऽंिरा।
यमापस्तम्भ्बसंवर्ताः कात्यायनबृहस्पती।।
पराशर व्यासशंखस्यलिखिता दक्षगौतमो।
शातातपो वशिष्ठश्च धर्मशास्त्रप्रयोजकाः।।[28]

योगीश्वरमहर्षियाज्ञवलक्यप्रणीतास्मृत्ष्यां महर्षिवशिष्ठः प्राचीनस्मृति–कारेषु स्मृतिकाररूपेणोलेखितः। आचार्य बलदेवउपाध्यायस्यानुसारेण 'वशिष्ठ' तथा वृद्धवशिष्ठः नाम्नो द्वयो स्वतन्त्रस्मृतिकारयोः भवयोः।[29] वृद्धवशिष्ठ यद्यपि कोऽपि ग्रन्थः नोपलब्धः। किन्तु ब्रह्मर्षिवृद्धवशिष्ठस्य विरचिता ज्योतिषशास्त्रस्य ग्रन्थः 'वृद्धवशिष्ठसंहिता' नाम्नः प्राप्नोति।[30]

इतोऽपि एषः ग्रन्थः हस्तप्रतिरूपेण संस्थिता अर्थात् अत्र प्रकाशिता अस्याः स्मृत्याः हस्तलेखः विद्यमानः अस्ति। याः स्मृतिः प्राविभावे विशेषविशालोऽस्ति। अस्य ग्रन्थे 10 अध्यायेषु 1100 श्लाकाः सन्ति।[31] तस्यां स्मृत्यिानुसारेण स्त्रीधर्म–श्राद्ध–अशौच–विष्णुमूर्ति प्रतिष्ठा विष्णुपूजनादिनां विषयानां विस्तृतविवेचनं प्राप्तम्।

''वशिष्ठस्मृति'' नामनग्रन्थः आनन्दाश्रमस्य स्मृतिसमुच्चये प्राप्तः। तत्र आचार–प्रायश्चित–संस्कार–रजस्वला–संन्यासी–अप्तायिनामादीनां नियमाः सन्ति। अपितु वशिष्ठस्य स्मृतिः उपलब्धः। किन्तु सा. 21 अध्याययुक्ता एव च। व्यंकटेश्वरप्रेससंस्करणे उपर्युक्तविषयानां विवेचनयुक्ता व्यंकटेश्वरप्रेस जीवनानन्दयो' सङ्ग्रहयोः प्रति एका एव द्वयोः प्रतयोः प्रायः शतमश्लोकाः सन्ति।[32]

**लघुवशिष्ठ स्मृतिः –**

महर्षि वशिष्ठस्य 1–10 अध्याय समन्विता एका अपरास्मृतिः अपि अस्ति। तस्या वैष्णवानां दैनिक कर्तव्यानां विवेचनं कृतम्।[33]

**वृद्धवशिष्ठ स्मृतिः –**

आचार्य उपाध्यायनुसारेण'वशिष्ठ' च वृद्धवशिष्ठ नाम्नोः द्वौ स्वतन्त्र–स्मृतिकारौ अभवत्। किन्तु वृद्धवशिष्ठस्य कोऽपि स्वतन्त्रग्रन्थ नोपलब्धः। तथापि अवान्तरकालीन् भाष्य निबन्धकर्तानां साक्ष्यधारेण वृद्धवशिष्ठस्य ग्रन्थोऽत्र सन्देह प्रमाणभूता। मिताक्षरायां 'जयपत्रस्य' लक्षणं वृद्धवशिष्ठस्य ग्रन्थात् उद्धुतम्। स्मृतिचन्द्रिकायां सम्भवतः 20 श्लोकः आह्निकश्च श्राद्धविषयोः उद्धृता। टीकाकारः विश्वरूपेण याज्ञवल्क्यस्य एकश्लोकश्च टीकायां वृद्धवशिष्ठस्य मते उल्लेखितम्। तेषां सर्वेषां औद्याराणां निष्कर्षात् 'वृद्धवशिष्ठस्य मते अपि प्राचीनमस्ति।

यत् याज्ञवल्क्यस्मृतीव आचरेण सह अन्यसर्वेषां व्यवहाराणामपि विशेषवर्णनं करोति। ग्रन्थाभावेन् वशिष्ठश्च वृद्धवशिष्ठद्वयोः परस्परसम्बन्धस्य निर्णये न कर्तुं शक्नुवन्ति।

**वशिष्ठशिक्षा –**

वाजसनेयीसंहितायां सङ्ग्रहितऋक्मन्त्रस्य यजुमन्त्रयोः पार्थक्यं शिक्षाग्रन्थे विस्तारेण कृतम्। येन शिक्षाग्रन्थानुसारेण शुक्लयजुर्वेदस्य समग्रसंहितायां ऋग्वेदीय मन्त्राः 1,4,6,7 सङ्ग्रहिताः। एवं यजुषानां संख्या 2832 प्रकीर्तिताः। एषः संख्याविभागः अस्य वेदस्य अध्ययनकर्तव्यं कृते अतीव उपादेयः इति। यजुर्वेदसंहितायाः सह एषा शिक्षा सम्बन्धिताः अस्ति।[35]

**ज्योतिषशास्त्रम् :–**

ज्योतिषशासत्रस्य रचनाकारः रायभट्ट वराहिमिहिरः ब्रह्मगुप्त लल्लाचार्यादीनां पौरुषेयग्रन्थानां ब्रह्मपूर्वे अष्टादशमहर्षिणां आद्याचार्यः सन्ति। महर्षिपराशरेन नवदश आचार्यणां उल्लेखिताः। तेभ्यः आचार्येभ्यः महर्षिवशिष्ठेऽपि सा›रेण उल्लेखितो अस्ति।

विश्वसृ›नारदो व्यासो वशिष्ठोऽत्रि पराशरः।
लोमशोयवनः सूर्यः च्यवनः कश्यपो भृगुः।।
पुलस्त्यो मनुराचार्यो पौलिशः शौनकोऽ›राः।
गार्गोमरीचिरच्येते ज्ञेया ज्योतिः प्रर्वतकाः।।[36]

सूर्यः पितामहो व्यासो वशिष्ठोऽत्रि पराशरः।
कश्यपो नारदो गर्गो मरीचिर्मनुरङ्गिराः।।
लोमशः पौलिशश्चैव च्यवनो यवनो भृगुः।
शौनकोऽष्टादशश्चैते जोतिःशास्त्र प्रर्वतकाः।।
ब्रह्माचार्यो वशिष्ठोऽत्रिमनु पौलस्त्य शमेशौ।
मरीचिराडि.गरा व्यासोनारदः शौनको भृगुः।।
च्यवनोयवनो गर्गः कश्यमत्र पराशरः।
अष्टादशैने गम्भीरः ज्योतिश्शास्त्र प्रर्वतकाः।।[37]

आचार्य वराहमिहिररचित पञ्चसिद्धान्तिकाग्रन्थे आचार्येण प्राचीनपञ्च –सिद्धान्तानां परिचयोः दत्तः। तत्र पौलिश–रोमकसौर पितामहेभ्यः सह वशिष्ठसिद्धान्तोऽपि दृश्यते। किन्तु वराहमिहिरानुसारेण वशिष्ठसिद्धान्तः भ्रष्टसिद्धान्तः इति ।

आचार्यब्रह्मगुप्तेन स्फुटसिद्धान्ते आचार्यविष्णुचन्द्रेण क्षरा उल्लेखितो वशिष्ठसिद्धान्तस्योल्लेखः कृतः।[38]

**वशिष्ठसिद्धान्तः –**

वशिष्ठसिद्धान्तस्य अतीवसंक्षिप्तविवरणं प्राप्नोति। अस्य सिद्धान्तस्य अधिकांशपितामहानुसारेण अस्ति। वराहमिहिरो स्वयं इमं सिद्धान्तं भ्रष्टं मन्यते। सम्भवतः विष्णुचन्द्रेण मूलवशिष्ठसिद्धान्तस्य एक संशोधितसंस्करणं प्रचारितम्। यत्संस्करणं ब्रह्मगुप्तं अतीवनिम्नकोटि एवं भ्रष्टं मन्यते। वर्तमानकाले 'लघुवशिष्ठसिद्धान्त' नाम्नः ग्रन्थो प्रकाशितः। सः ग्रन्थः प्राचीनसिद्धान्तान् अपरेश्चेति।[39]

**वशिष्ठसंहिता –**

वशिष्ठसंहितायाः महत्वं ऐतिहासिकदृष्ट्या तु नितरां वरीवर्ति। तत्रैव विषयाणां निर्धारणस्थापि नितरां महत्वम्। भुत्रकूटविचारे यात्राव्यवहारे दोषनिर्धारणे, वास्तुप्रकरणे, अरिष्टशान्तये च विद्यन्ते। बहवो विचारणीयाः गम्भीरा विषयाः।[40]

वशिष्ठसंहितायाः विषयाः 46 अध्यायेषु विभक्ताः सन्ति। सर्वेषु संहिताग्रन्थेषु वशिष्ठसंहिताया नाम प्रथमं एवास्ति। अस्याः विषयापि सुगम्भीराः, सरलाः, सुघटिताः, घनीभूताः, सुस्पष्टाश्च सन्ति। प्रथमोऽध्यायः शास्त्राध्यायः अस्ति। द्वितीयोऽध्याये सूर्यचाराध्यायोल्लेखः अस्ति। सूर्यगत्याः शुभाशुभं फलं दर्शितम। तृतीयाऽध्याये चन्द्रमसः उदयास्ताभ्यां शुभाशुभ फलं दर्शितम्। चतुर्थेऽध्याये भौमगतिः विवेचनमस्ति। पञ्चमाध्याये बुध–चारवशात् जगति शुभाशुभफलानां विस्तरेण वर्णितम्। बुधस्य सप्तप्रकारस्य गतिर्वर्ण्तिम् सर्वगतिषु शुभाशुभफलानां वर्णनं विस्मरेण कृतम्। षष्ठाध्याये गुरुचरणवर्णनमस्ति। सर्वाध्यायेषु सर्वाधिकविस्तृतोऽध्यायः अस्ति। अध्याय 102 श्लोकाः सन्ति।

गुरु–उदयास्ताभ्यां शुभाशुभफलानां विस्तरेण वर्णितमस्ति। बृहस्पति आधारेण षष्ठीसंवत्सराणि उल्लेखितानि ।[41]
सप्तमे शुक्राचार्याऽध्याये 19 श्लोकाः सन्ति। क्रमेण द्वादशराशिषु शुक्रस्य उदयास्त एवं भ्रमणात् चराचरजगति सम्भवितुं शुभाशुभफलप्रभावः वर्णिताः। शुक्रस्यवक्रीमार्गस्य वर्णनं कृत्वा अध्यायस्य समाप्ति कृतास्ति।[42]
अष्टाध्याये शनिचाराचराध्याये 6 श्लोकाः सन्ति। क्रमेण विभिन्ननक्षत्रेषु शनिगमनात् विभिन्नदेशेषु स्थानेषु शुभाशुभप्रभावा वर्णिताः सन्ति। नवमे राहुचाराध्याये प्रचीनसमुद्रमंथनप्रस›S भगवानविष्णुना चक्रेण राहोः शिरच्छेदनं कृतं तथापि अमृतपानं कृत्वा सः जीवितः भवति तदा विष्णुना राहुं अष्टग्रहेषु स्थानम् उत्तमम्। अपरञ्च राहोः शुभाशुभ फलं वर्णितम्।[43]
दशकेतु चाराध्याये केतु प्रभाववर्णनमस्ति। अत्र एकादशाध्यायेः वर्षादि निर्णयफलाध्यायः अस्ति। अत्र ब्रह्म–दिव्य–मनु–पितृ–सौर–चन्द्र–गुरु–सावनञ्चन्द्रनक्षात्रादि नवकालमानस्य विस्तारेण वर्णनमस्ति। द्वादशाध्याये तिथिस्वरूपाध्याये 75 श्लोकाः सन्ति। प्रत्येकतिथिषु कि कार्यं करणीयम्, किं न करणीयम् इति विचारणीयम्।[44]

त्रयोदशाध्यायः वारस्वरूपाध्यायः अस्ति। चतुर्दशाध्याये नक्षत्रवर्णनमस्ति। पञ्चदशोध्यायः योगाध्यायस्य अस्ति। तत्र योगवर्णनं विस्तरेण चर्चा कृतास्ति।

करण–मुहूर्त–गोचरविचार–संक्रान्ति–चन्द्रमाबल–उपग्रहः ग्रहकूट–लग्नबल–आधानादिविषयानि 16 तः 24 अध्याय पर्यन्तं वर्णितमस्ति।[45]

पुंसवनसीमन्ताध्य नाम्नः पञ्चविंशति अध्याये गर्भाधानात् तृतीयमासे पुंसवनसंस्कारो करणीयम्।[46] तथा च षड्विंशति अध्याय तः सप्तत्रिंशताध्यायपर्यन्तमं जातककर्म, अन्नप्राशन, चौलकर्म, उपनयन, समापवर्तन, विवाहप्रश्न, विवाह, राज्याभिषेक, अश्वारिष्ट, गजारिष्टशांति, ग्रहशान्ति, यात्रादि विषयानि विस्तरेण वर्णितानि।[47]

अष्टत्रिंशताध्याये गृहप्रवेशाध्याये अस्ति। नूतनगृहप्रवेशस्य कालमुर्हूतवर्णनं अस्ति। गृहप्रवेशकाले शुक्रपृष्ठे, सूर्यवामे कृत्वा

अग्रेब्राह्मणान् पूजयित्वा पूर्णकुम्भं गृहीत्वा मालायुक्त तोरणयुक्त स्त्रीभिः गतिवाद्यैः संगीतंकृत्वा नूतनगृहे प्रवेशः करणीयम।[48]

39 तमे अध्याये वास्तुनिरूपणमस्ति। 40 अध्याये सूरप्रतिष्ठाध्याये महर्षिवशिष्ठः कथ्यति यत् अतं अहं विष्णुशंकरयो देवायोः प्राणप्रतिष्ठां कथ्यामि।[49]

एकचत्वारात्रिंशतगुणनिरुपणाध्याये 52 श्लोकाः सन्ति। कालः एव ईश्वरः। साक्षात् ईश्वरो कालो हि ज्ञातव्यमिति। यः कालं जानति सः ईश्वरं जानति। इमं कालं पृथ्वीस्थितयोपयोगी अपि देहधारिणां कल्याणाय ब्राह्मनं भचक्रभ्रमणात् स्थूलकालस्य निरूपणं कृतम्।[50] द्वाचत्वारिंशताध्याये दोषनिरूपणमस्ति। त्रिचत्वारिंशताध्याये गुणदोषोपवादः नाम्नः अध्याये 172 श्लोकाः सन्ति। चतुरत्रिंशताध्याये वस्त्रपरिधानवर्णनमस्ति नूतनवस्त्रधारकः सत्कीर्ति–सौभाग्य कः शत्रुदमन कः सत्भाषणकः कान्तिप्रदान कः विद्यातिलकः सभायांजयदाता त्रैलोक्यवशकर्ता भवति।[51] अथ नक्षत्रानुसारेण शुभफलानि दर्शयामि।

पञ्चचत्वारिंशताध्याये उत्पाताध्याये 193 श्लोकाः सन्ति। अस्मिन् अध्याये प्रकृतिसम्भोत्यातानां वर्णनमस्ति। यदा अधर्मः असत्यं नास्तिक्यं अतिलोभः अनाचारः तथा प्रजाभिः सह अन्यायं अभवत तदा उत्पातस्य काणं भवति। दिव्यं अर्थात् देवलोके अन्तरिक्षे पृथ्वीलोके च उत्पातत्रय –प्रकारकाः भवन्ति।[52] अस्मिन् अध्याये कुइचा अर्थात् सरटी यतनेस्यफलस्यापि वर्णनं कृतम्।[53] षड्चत्वरिंशताध्याये रोगोत्पत्तिशान्ति नाम्नः ग्रन्थान्धायाये शरीरधारिणान् रोगात् पीड़ा भवति। अथ् रोगशक्तिः कथनम् कृत्यो ग्रन्थः पूर्णः कृतः इति।

46 अध्यायेषु सः वशिष्ठसंहिता प्रणीता। आदिकाव्ये वाल्मीकि–रामायणे बालकाण्डे एव महाराज्ञो दशरथः पुत्रेष्टियज्ञानुष्ठाय वशिष्ठेन प्रार्थितं तेन च यज्ञनुष्ठानार्थे कृतः उद्योगः, एवं उद्योगः कृतः।[54] मर्यादापुरुषोत्तमस्य श्रीरामचन्द्रस्य अन्येषां भ्रातृणां सह च कुण्डल्यां विचारपूर्वकं महर्षिवशिष्ठोगुणानुरूपं नामानि चकार–

अतीत्यैकादशाहं तु नामकर्म तथा करोत्।
ज्येष्ठं रामं महात्मानं भरतं कैकेयीसुतम्।।

सौमित्रिं लक्ष्मणमिति शत्रुघ्नमपरं तथा।
वशिष्ठः परमप्रीतो नामानि कुरुते तदा।।[55]

अस्मिन् प्रस›ऽपि महर्षिवशिष्ठस्य ज्योतिषशास्त्रस्य ज्ञानं प्रदर्शितम्।

**वास्तुशास्त्रम् –**

किञ्च सप्तऋषु वशिष्ठः भृगुञ्च सर्व श्रेष्ठत्वेन ज्ञायन्ते। मत्स्यपुराणे वास्तुशास्त्रस्य आद्योपदेशकः उल्लेखिताः। यथा –

भृगुरत्रिर्वशिष्ठश्च विश्वकर्मा मयस्तथा।
नारदो नग्नजिच्चैव विशालाक्षः पुरंदरः।।
ब्रह्मा कुमारो नन्दीशः शौनको गर्ग एव च।
वासुदेवोऽनिरुद्धश्च तथा शुक्रवृहस्पतिः।।
अष्टादशैते विख्याता वास्तुशास्त्रोयपदेशकाः।
संक्षेपेणोपदिष्टं यन्मनवे मत्स्यरुपिणा।।[56]

महर्षिवशिष्ठस्य 'शिल्पशास्त्रे' कोऽपि ग्रन्थः आसीत्। मानसारेपरि–शिष्टविभागे 120 जीर्णोद्धारलक्षणाध्यायं लिखितं यत् –

अथ वक्ष्ये विशेषेण जीर्णोद्धारणं लक्षणम्।
वशिष्ठाादि ऋषीणां चेश्वरेण प्रचोदितम्।।
भूलोके तु प्रतिष्ठा स्यात् देवालयः विशेषतः।
ऋषिभिः पूजितं पूर्वमसुरराक्षसकिन्नरैः।।[57]

1.स्थापत्यवेदस्य द्वयेपरम्परे प्रकीर्तिते –

2.उत्तरापथीय परम्परा/ नागरपरम्परा।

दक्षिणापथीय

परम्परा–ब्रह्मा–त्वष्टाः–मय–मातंग–भृगु–काश्यप–मान

–अगस्त्य–शुक्र–पराशर–नग्नजीत–नारद–प्रहलाद–शुक्र–वृहस्पतिः आदयः प्रवर्तकाः सन्ति।

प्रथमपरम्परायाः शम्भुः–अत्रि–पराशर–विश्वकर्मा––गर्गः–वशिष्ठः–बृहद्रथ वासुदेवो अष्टोपदेशकाः।[58]

महर्षिवशिष्ठस्य वशिष्ठसंहितायां वास्तुविषयकौ द्वौ विस्तृताध्यायौ सङ्ग्रहितौ। यथा – ब्रह्मर्षिवृद्धवशिष्ठसंहितायां अष्टत्रिंशताध्याये गृहप्रवेशाध्याये 24 श्लोकाः सन्ति। तत्र नूतनगृहप्रवेशाय उत्तरायणस्य सूर्यगुरुसूर्योबलवानौ शुक्लपक्षश्च शुभवासरे वास्तुपूजनं कृत्वा भूतबलिं कृत्वा नूतनगृहे प्रवेशं करणीयम्।[59] प्रथमप्रवेशपूर्वसंज्ञकः कथितः। दिन्प्रवेशः शुभदः भवति। तेन पुत्रपौत्रादीनां अभिवृद्धिं करोति। रात्रिप्रवेशः शुभदः नास्ति।[60] नूतनगृहप्रवेशपूर्वं प्रवेशः इति यात्रावसाने प्रवेशोसुपूर्व प्रवेशः अन्यञ्च अग्नि जलवायुभ्यः यातितस्य गृहस्य पुनः जीर्णोद्धारं कृत्वा तस्मिन् गृहेप्रवेशः द्वन्द्वप्रवेशः इति कथनीयम्।[61]

माघमासेगृहप्रवेशे धनलाभौ भवति। फाल्गुनमासे पुत्रश्च धनलाभौ चैत्रे धनहानिः, वैशाखमासे पशुश्च, पुत्रलाभः, ज्येष्ठमासे शत्रुभ्यश्च हानिः भवति स्म।[62] कृष्णपक्षे गुहप्रवेशः शुभकारको च भवति। कृष्णपक्षस्य दशमीपर्यन्तं शुभदः इति। शनिवासरोऽपि गृहप्रवेशाय शुभदः कथ्यते।[63] यदा प्रवेशः लग्नात् अष्टमस्थाने कोऽपि क्रूरग्रहः स्थितः तदा कर्ता गृहकर्तुः त्रयवर्षेषु अरिष्टं भवति। वास्तुपूजासहित बलिना–विना–छादनेन विना, कपाटभ्यां विना, गृहं अभवत तदा ता एतादृशः गृहे प्रवेशः च करणीयम्।[64]

महर्षिवशिष्ठस्य कथनम् अस्ति यत् शुभप्रवेशाय –

कृत्वा शुक्रं पृष्ठतो वामतोऽर्कं विप्रान्पूज्यानग्नतः पूर्णकुम्भकम्।
हर्म्यं रम्यं तोरणैः स्त्रग्वितानैः स्त्रीभिः सम्यक् गीतवाधोर्विशेतत्र।[65]

वशिष्ठसंहितायां 39 अध्याये वसित्वाध्यायः तेषां 223 श्लोकेषु महर्षिवशिष्ठेन वास्तुनिरूपणं कृतम् ग्रन्थकारः कथ्यते यत् –

वास्तुज्ञानं प्रवक्ष्यामि यदुक्तं ब्रह्मणा पुरा।
ग्रामसप्तपुरादीनां निर्माणं सूक्ष्मतोऽधुना।।[66]

सर्वप्रथम गन्ध–वर्ण–रसेभ्यः–भूपरीक्षणं करणीयम्। भूम्यां एकहस्तस्य खातं कृत्वा प्रथमप्रहरे जलेन पूर्णं कृत्वा प्रातःकाले सम्यक्कृत्वा खातनिरीक्षणं करणीयम्। यदा जलयुक्तखातः स्यात् वृद्धिःभवति, यदा पङ्ँयुक्तखातः स्यात् तदा भूमिः फलादा भवति, यदा व्रणयुक्त भूमि भवेत् तदा हानियुक्ता भवति । शुष्कभूमिः स्यात् तदा मृत्युदायकाः इति।[67]

भू–परीक्षा शंखस्थापनं तेन आधारेण दिशाशोधनं षडवर्गरीत्यानुसारेण भूमिशोधनं द्वारस्थापनम् अष्टदिशाद्वारफलानि, एकाशीति– वास्तुमण्डलम् यदमण्डलाधरेण वास्तोः मर्मस्थानानि सन्धिनिर्णयम्, गृहनिर्माणे –नक्षत्रपदविचारः, राशिविचारः, ग्रहविचारः, आयविचारादि विषयानि महर्षिवशिष्ठेन निरूपितानि। परम्परानुसारेण महर्षिवशिष्ठेन वास्तुपुरुषवर्णनं कृतम् यथा–

गृहात्मको वास्तुपुरुषस्त्रिनेत्रः स्वेदसम्भवः।
पूर्वादिदिकच्छरोवामपार्श्वशायी प्रदक्षिणम्।।[68]

**वास्तुपूजनकालः** –

द्वारनिर्णयः, खातमुर्हूर्तम्, शङ्कुरोपणम!, शङ्कुनिर्माणाय काष्ठनिर्णयः, शंकुनिर्माणविधिः, शल्यशोधनम्, निमित्तशल्यम्, रवीन्द्रनिमित्तशल्यम् प्रश्नशल्यम् गृहभेदाः[69] गृहभेदानुसारेण फलमित्यादि वर्णितानि।

अतः अत्र वास्तोविधानश्च पूजनं विस्तरेण वर्णितम्। कथितं यत् विधिवत् पूजनं कृत्वा ब्राह्मणेभ्यः भोजनं कारयित्वा स्वबान्धवैः सह भोजनं कृत्वा वास्तुपुरुषं प्रणम्य पूज्यानां दक्षिणं दापयेत। एवं यः कुरुते सः धन–धान्यादीनां सम्पन्नं भूत्वा पुत्रपौत्रादिभ्यः पूर्णो जातः। यथा –

एवं यः कुरुते सम्यग्वास्तुपूजा प्रयत्नतः।
आरोग्यं पुत्रपौत्रादि धनधान्यं लभेन्नरः।।
वास्तुपूजामकृत्वा च प्रविशेन्नवमन्दिरे।

रोत्रान्नानाविधान्केशानश्णुते सर्वसंकटान्।।[70]

**आयुर्वेदशास्त्रम् –**

वैद्यकशास्त्रे महर्षिवशिष्ठस्य कोऽपि ग्रन्थः विद्यमानः नास्ति। किन्तु प्राचीनपरम्परायाः महर्षिवशिष्ठः प्रर्वतकाचार्योपेणाल्लिखिता यथा – काश्यपसंहितायां स्वयम्भूब्रह्मा प्रजाः सिसृक्षुः प्रजानां परिपालनार्थमायुर्वेद–मेवाग्रेऽसृजत्। [71]

**ब्रह्मा**
⇓
**दक्षप्रजापतिः**
⇓
**अश्विनकुमारौ**
⇓
**देवराज–इन्द्रः**
⇓

⇓ चरकसंहिता ⇓ सुश्रुतसंहिता ⇓ काश्यपसंहिता[72]

चरकसंहिता ⇓ भारद्वाजमहर्षिः ⇓ आत्रेयपुनर्वसुः ⇓

सुश्रुतसंहिता ⇓ धन्वन्तरि

अग्निवेशः जतूकर्णः भेलः पराशरः हारितः क्षारपाणिः

**धनवन्तरि**
⇓
औपधनेवः औरभ्रः पौयाकालवतः करवीर्यः गोपुरक्षितः सुश्रुत

**काश्यपसंहिता**
⇓
काश्यपः वशिष्ठः अत्रिः भृगुः

वशिष्ठः ⇓ तेषां पुत्राः एवं शिष्याः

अन्यपरम्परानुसारेण देवराजइन्द्रेण आयुर्वेदस्य अद्भुतज्ञानं महर्षि भृगु – अङ्गिरा – अत्रि – वशिष्ठ – अगस्त्य –पुलस्त्य–वामदेव– गौतम – असितादिभ्यः ऋषिभ्यः दत्तम्।[73]

भृगु–अगस्त्यश्च वशिष्ठादयः रसतन्त्राचार्यः मन्यते।[74]

**वशिष्ठतन्त्रम् –**

आयुर्वेदः अष्टा›ानि कथ्यते। तत्र अष्टा›षु रसायनतंत्रविभागः अस्ति। रसायनतंत्रस्य प्राचीनग्रन्थनामवलि बलदेव उपाध्यायेन दत्ता यथा – पातञ्जलितन्त्र, व्याक्तितंत्र, वशिष्ठतंत्र, माण्डपतंत्र, नागार्जनतंत्र, लक्षणपुरातन्त्राश्च आरोग्यमञ्जरी इति रसायनतंत्रविषयकविशालग्रन्थाः सन्ति। तेषां वशिष्ठतन्त्रमपि अस्ति।[75]

आयुर्वेदस्य सर्वेषांप्रभावकम् अ› रसतन्त्रम् इति। रसायनतंन्त्रस्य आविर्भावकाविचारकचार्यः गुरुमहादेवो अस्ति।[75]

रामायणेऽपि महाराजदशरथस्य मृतशरीरस्य रक्षणाय महर्षि वशिष्ठज्ञाना –नुसारेण नृपस्य मृतशरीरं औषधश्च नानाविधतैलपूर्णा पूर्णानौकायां रक्षितम् इति।[76]

तलद्रोण्यां तदात्मात्याः संवेश्य जगतीपतिम्।
राज्ञः सर्वाव्यथादिष्टाश्चक्रः कर्माव्यन्तनन्तरम्।।[77]

**ज्ञानसागरतन्त्रम् –**

वैष्णवसम्प्रदाये पञ्चरात्रं सप्तरात्रादौ सम्प्रदायौ प्रकीर्तितौ। अग्निपुराणे विष्णवादिदेवानां प्रतिष्ठाविषये हयग्रीवेन् कथितं यत् 'मया वर्णितयोः पञ्चरात्रसप्तत्रयोः महर्षीनि प्रचारः कृतः। तत्र पञ्चविंशतितन्त्रेषु महर्षिवशिष्ठ कृतं वशिष्ठोक्ता ''ज्ञानसागरतन्त्रम्'' नाम्नः ग्रन्थः कथ्यते।[78]

**योगवशिष्ठम्–महारामायणम्–वशिष्ठरामायणम् –**

वेदान्ते कोऽपि ग्रन्थः एतादृशः विस्तृतश्च अद्वैतसिद्धान्तं अनेकाख्यानायुक्तियुक्ति दृष्टान्तैः सह दृढ़प्रतिपादनं कृत्वा न लिखितः। अस्मिन् विषये सर्वसम्मत्यास्य ग्रन्थस्य विचारमात्रेण कोऽपि

विषयासक्तश्चसंसारमग्नो पुरुषोऽपि वैराग्यसम्पन्नो भूत्वा क्रमेण आत्मपदे विश्रान्तिं प्राप्नोति।[79]

श्रीमद्भगवतगीतायाः लेखकः महर्षिवेदव्यासः किन्तु गीतायाः उद्गाता –रचनाकारः भगवानश्रीकृष्णः तथैव योगवशिष्ठस्य मूलोपदेशकः च वक्ता महर्षिवशिष्ठैव अस्ति, आदिकविवाल्मीकि अस्य ग्रन्थस्य लेखकः मात्रोऽस्ति।

संशययुक्तो सुतीक्ष्ण अगस्त्याश्रमे गत्वा ऋषि अगस्त्यं आदरेण सह प्रश्नाः पृच्छन्ति अगस्त्येन अग्निवेशस्य ब्राह्मणपुत्रवरुण्यस्य प्राचीनेतिहासः कथितः। वैराग्येन कर्मत्यागीपुत्रं पिताग्निवेशः एकाप्राचीना कथा कथ्यते। तदनुसारेण अप्सरेषु श्रेष्ठसुरुचि हिमालये निवसति स्म। तथा आकाशगामी इन्द्रदूतः दृष्टः, तदन्तरं अप्सरा–दूतसंवादे अरिष्टनेमिनाम्नः नृपः पुत्रं राज्यं दत्वा, रागद्वेषरहितं भूत्वा तपार्थे वने गतवान्। नृपः गन्धमादने समाधिस्थः जातः, अन्यञ्च नृपस्य स्वर्गस्या स्थानिच्छा ज्ञात्वा देवदूतः इन्द्रसमपि गत्वा तं निवेदयाति। तदा राज्ञः सर्ववृत्तान्तं ज्ञात्वा नृपस्य आत्मज्ञानाय महर्षिवाल्मीकिराश्रमं प्रति नृपं आननाय दूतं प्रेषयति। अरिष्टनेमिराज्ञः मोक्षविषयकप्रश्नाः श्रुत्वा महर्षिवाल्मीकि अरिष्टनेमिं प्रति महर्षिवशिष्ठ –रामचन्द्रयोः संवादरूपेण योगवशिष्ठ– रामायणस्योपदर्शयति।[80]

प्रथमवैराग्य प्रकरणे रामस्य तीर्थयात्रा दिनव्यवहार निरूपणं–विश्वमित्र –आगमनं–विश्वामित्र–दशरथयोसंवादः, दशरथस्या वशिष्ठाश्वासनं, राघवविषाद,राघवंप्रति–अश्वासनं, परितापदिनि विविधानि विषयानि वर्णितानि।[81] रामेण यौवनगर्हा बाल्यजुगुप्सा, स्त्रीजुगुप्सा, जराजुगुप्सा, कालापवाद–अहंकारजुगुप्सा, दैवविलासवर्णन, तृष्णाभ›, चित्तदौरात्म्यादि विषयानि वर्णितानि सन्ति।[82]

मुमक्षुव्यवहारप्रकरणे सदाचारनिरूपणं–संतोषादि निरूपणं कृतम्।[83] उत्पत्ति प्रकरणे बन्धहेतुः, मूलकारणं एवं मुमुक्ष प्रयत्नोपदेशः जगदुत्पत्ति परमार्थवर्णनं परमकारणवर्णनं, जगतादिदृश्यास्तपरिज्ञानम् तानि सर्वाणि विषयानि वर्णितानि सन्ति।[84]

स्थितप्रकरणे अनेकयुक्ति प्रयुक्ति दृष्टान्तभिः। प्राचीनाख्यानेन वेदान्तोपदेशः वशिष्ठेन कृतः।[85] पञ्चमेप्रकरण उपशमप्रकरणेऽपि इन्द्रियानुशासनयोगः, संसृतिबीजविचारयोगः मोक्षस्वरूपोपदेशः संसारोपदेशादि –विषयाः आख्यानेन सह सोदाहरणेन कृतम्।[86] निर्वाणप्रकरणे चतुर्दशसहस्रश्लोकाः सन्ति।[87] प्रकरणे विभागद्वयमस्ति। वशिष्ठानुसारेण आध्यात्मशास्त्र रूपौषेधेन विना तृष्णारूपी विशूचिका कदापि शान्तं न भवति।[88] यत् पर्यन्तं आत्मज्ञानस्य प्राप्ति न भवति तदपर्यन्तं अस्मिन् जगति जगत्–रूपेण भासते, ज्ञानान्तरं तस्मिन् जगत् जगद्रूपेण न भासितम्। किन्तु शुद्धचिन्मात्रब्रह्मरूपेण भासते। वास्तुत तत्सर्वं तु केवलचिन्मात्रैव भाषते व्यक्तिमपि भाषते तत्सर्वंतत्केवलंचिन्मात्रैव इति।[89] कोऽपि वस्तुं सत् वा असत् नास्ति। अतः मानवो स्वयमेव स्वयं जले भ्रमिततृणं सदृशं अस्यां जगतिभ्रान्तयो निष्कासनं करणीयम्। तत्रैव सुखस्य हेतुः भवति इति।[90]

आत्मज्ञानाय उपायद्वयं योगः, ज्ञानश्च। वस्तुतः द्वौ उपायौ योगानन्तरर्गनैव ऋषिणा कथितौ विषयं भुशुंडिस्थाने वशिष्ठेन सम्यकरीत्या निरूपितम्। महात्मा भुशुंडि चित्तनाशस्योपाय प्राणपानयोः गत्याः साक्षीभूतम् इति दर्शयति।[91] द्वितीयो उपायो ज्ञानमस्ति। वैराग्याभ्यां द्वारा अहंभावं अनुहं भावे लयत्वात् प्राप्नोति। महादेव–वशिष्ठसंवादे विस्तरेण दर्शितम्। महादेवः उवाच–न विष्णुश्च न त्रिनेत्रधारी शिवस्य, न ब्रह्मा न इन्द्रश्च न क्षत्रियश्च न यवनश्च, न सूर्यश्च, नाग्निश्च, न चन्द्रमा न ब्राह्मणोश्च न त्वं न अहं न कोऽपि देहधारी वा चित्ररूपधारी देवशब्दात् कथितः सो देवः अकृतिमाद्यान्तरहितश्च चित्तस्य रूपचिन्मात्र भासेत उपास्यतु।[92]

अस्मिन् त्रिप्रकरणे वशिष्ठेन श्रीकृष्णार्जुनसंवादरूपेण गीताविचारोऽपि संक्षेपेण वर्णितः। अहमस्मि मम 'एतत्मम्' अस्मात् सर्वदुःखं भवति। किन्तु मयि कृतत्व भोक्तृत्वश्च नास्ति। इति ज्ञानाधारेण पुनः सुख–दुःख कर्म–अकर्माभ्यां बन्धनं न भवति।[93]

अनन्तरेण भगीरथोपाख्याने यत् दर्शितं–'यदा बुद्धयाः राज्यादिकाभिमानं त्यक्त्वा भयशून्यश्च सर्व ईच्छारहितश्च अकिंचन भूत्वा एवं स्वस्य सर्वलक्ष्मीं सर्वशत्रून् दत्वा अहंकाररहितो भूत्वा तेषां शत्रूणां गृहे भिक्षाटनं कृत्वा गुरुमपि त्यज्यति, तदा ब्रह्मपदं प्राप्नोति भवितः।[94] यथा शिखाध्वजेन तस्य राज्ञी चूडाला उपदिशति, तेन दर्शितम् तत्कालीननारीणामपि कथं विद्वता भवति इति।[95]

इक्ष्वाकु–मनुसंवादे निरूपिते यत् परमेश्वरो न शास्त्रात् न गुरोः किन्तु स्वच्छनिर्मल बुद्धे इव प्राप्तः। 'अहं देहोऽस्मि।' एषां बुद्धिः संसारबन्धनस्य हेतुः इति। अहं अंकिचिन्मात्र चिन्मात्रारूप आकाशात् सूक्ष्मेस्मि। एषा बुद्धिः संसारबन्धनात् मुक्तकर्मी अस्ति। मोक्षः कोऽपि देशस्य कालस्यश्च नाम अस्ति। सो केवलाहंकारस्य नाम [96] अत्यन्तन्मयो भूत्वा यथावात् स्थितः भूत्वा यः शिवः सर्वजगतशान्तबोधात्मकाजश्च शुभ–एकपद (शिव) अस्ति। तस्य भावना कृताः इति सर्वत्यागः अस्ति। अथैव भावना कृत्वा अस्मिन् संसारे विचरतु। वशिष्ठोपदेशस्य सारः यत् –

स्वयं विचार्य स्वयमेव चेतसा तत्प्रायते येन न शोभते यनुः।
सत्संगसच्छास्त्रविवेकतः पुनवैरात्र्ययुक्तेन विभाव्यमेतत।।[97]

अस्मिन् प्रकरणे उत्तरार्धो यौ पूर्वार्द्धात् अतीवविस्तृतः इति। जगद्ब्रह्ममयोः एकता दृढ़ीभूता कृता। वशिष्ठकथनानुसारेण यदा निमेषयां अहंभावना जाग्रता तदा निमेषायषं अनहं भावना करोतु।[98]

अन्यञ्च तां भावनां हृदि धारयेत यत् सर्वं जगत् अह्मस्मि। मत् पृथक किमपि नास्ति। वा न अहमस्मि न तत्जगत् किन्तु चिन्मात्रैव विराजते। चित्तस्य जगतः कारणमस्ति। यदा चित्तंबहिर्मुखं भवति। तदा प्रथमोऽहं पश्चात् मम पश्चात् पुनः इदं स्फूरितं चित्तप्राणान्तर्गतं अन्यञ्च चित्रान्तर्गतः अस्ति। अनयोः द्वयोः सम्बन्धः बीजाड्कुरवत् अस्ति। अथ यदा जगत् चित्तान्तर्गतस्ति। तदा चित्त्निरोधात् जगदस्फूरणां न भवति।[99]

जागृतं सुषुप्तवत् च सुषुप्तं जागृतवत् पश्यति स तत्पदं प्राप्तं करोति। यः एकोनास्ति, न द्वयौ न जगत् न माया अस्ति। किन्तु आकाशवत् शुद्ध×चनिरामयमस्ति। तत्र वाण्याः गतिः नास्ति। वाणी तत्पर्यन्तप्रवेशं करोति तस्यलेशो भवति। आत्मपदं वाणीकलंको न धारयति।[100]

यदा मानवस्यहृदि एषा शुभभावनोत्पन्नयति, यत् अहं एषः संसारसमुद्रे कथं तरयामि, एतेषां क्षणभङ्गुरसुखानामपेक्षया माम तत्सुखंयत्सदासर्वदा एकरसमस्ति कथं प्राप्नोति। तदा सः मानवो शुभेच्छेनाम प्रथमभूमिकायां प्रवेशयति इति।[101]

पुनः सत्संगश्च सच्छास्त्रविचारेण कर्तव्याकर्तव्ये ज्ञात्वा स्वस्य बहिर्मुख भविताचित्तम् अवरोधयतु। परञ्च तस्य चित्तमलानां प्रक्षालनं कृत्वा शुभविचारे तत्परो भवेत। एषा सुविचारणनाम्नी द्वितीयभूमिकास्ति।[102]

तृतीयां भूमिकायां सः यत् ज्ञापयति यत् अहं चिदाकाशरूपोऽस्मि। अन्यञ्च इयं अनुभवं दृढ़ीकरणाय वैराग्यं वर्धयति। विषयवासना क्षयाकृता, मनोवातीतिपदे एषा त्रया भूमिका इत्युक्ते प्रयत्नयति। इमामवस्थां तनूमासा कथ्यते। जागृतिभूमिकाः इति।[103] तत्पश्चात् सत्वायाति असंसक्तिश्च [104] यः निरासक्तो भूत्वा सर्वेन्द्रियाणां विषयानि गृहणाति। यः सुषुप्तधनोभूत्वा जाग्रति। यस्मिन् आरोप्यदृष्ट्यै एतत्जगत् ज्ञायते। किन्तु अपराधदृष्टयै किमपि न भवति। तत्चिदाकाशे ज्ञानिः स्थितिः भवति। एषो पाषाणोयाख्यानस्य सारः भवति।[105] कश्चिदाख्यानेस्य यत् सारो जगत्मायायाः अन्त जगति भ्रमणतः किमपि न प्राप्तम्। भविष्येमपि किमपि न प्राप्तम्। यत् जगत् सत्यवत् भासते दीर्घकालीस्वप्नातधिकं किमपि नास्ति। जीवनस्य निजस्वस्य–अभ्यस्ता वासना यस्मिन्–यस्मिन् पदार्थे दृढ़ीभूता सो पदार्थः व्यप्तिं दृढं भासते। अन्यञ्च अनेकानां प्राणीनां एकवासना भवति। तदा इमं तदैवपदार्थः भासते। तस्याः नाम जगन्माया अस्ति।[106]

अन्ततोगत्वा पवित्रकथनानां वक्ता स्वस्यदोषानां ज्ञाता–समदर्शी–उदार–उदारचरित्– दानशील– स्निग्धस्वभावी–अति–

कोमलानि तानि जीवनमुक्तस्य लक्षणानि। तं सदासमाधैः सुखं व्यवहारकालेऽपि भवितुम शक्नोति। सम्पूर्णव्यवहारे स्थित्वा ब्रह्मेस्थितः आत्मनः भिन्नात् कोऽपि पदार्थं न जानति। तानि सर्वाणि ज्ञानिनः लक्षणानि सन्ति।[107] अन्ततोगत्वा रामेण वशिष्ठ प्रश्नः कृतः यत् भवतः एषो सिद्धान्तो अस्ति।

यत् कारणस्याभावेनारंभे सृष्टिः न भूता। केवलाभासो वा भ्रममात्र तदा एषः भ्रमः कं अभवत्। वशिष्ठेन उत्तरं दत्तः वस्तुतः भ्रमः इव नास्ति। केवल दृढ़ज्ञानेन अस्य विना एकपरम्परा इव नानातत्वरूपेण भ्रान्तश्चाज्ञानाभावेन् ज्ञायते।[108]

इत्थं वशिष्ठेन यदा रामाय उपदेशो कृतः तदा तं तत्सर्वं ज्ञात्वा यद् विद्या–अविद्या, सुखं–दुःखानां परिज्ञातान्तरं केवलब्रह्मैव अस्ति। जगदपि तस्मात् किमपि व्यक्तिरिक्त नास्ति। रामः कथितः यत् ''अथ अहं स्वस्य–स्वरूपं ज्ञातं किन्तु अन्यरूपं न भवति। पुरा बंह्मं आसीत्। सः अधुना ज्ञानान्तरं निजस्वरूपात्मा भवतिः।[109] हे मुनेः! ज्ञानोदयात् अहं निर्वाणरूपोऽस्मि। अज्ञाजनावशात् शŠारीतोऽस्मि विक्षेपरहितनित्यात्मसुखे यथास्थित नित्यानन्तात्मस्वरूपे स्थितोऽस्मि। एवमेववशिष्ठरामसंवादे वेदान्त –विषये गहनतत्वचर्चा भविता। तस्य अतीवसंक्षेपण अत्र निरूपणं कृतमस्ति। प्राचीनवनीचरित्रकोशानुसारेण ''वृद्धवशिष्ठ'' नामको अन्यकोऽपि ग्रन्थः वशिष्ठेन रचितः यस्य निर्देशः विश्वरूपे एव मिताक्षरायां प्राप्तः।[110] अन्य×च महर्षिवशिष्ठस्य ज्योतिर्वशिष्ठः' नाम्नः ग्रन्थस्योद्धरणानि स्मृतिचन्द्रिकायां प्राप्नुवन्ति।

उपर्निदिष्टग्रन्थानुरिक्त महर्षिवशिष्ठस्य अधोलिखितग्रन्थास्यपि प्राप्ता।[111] यथा–

1. वशिष्ठकल्पः।
2. वशिष्ठतन्त्रम्।
3. वशिष्ठपुराणम्।
4. वशिष्ठलि›ापुराणम्।
5. वशिष्ठश्राद्धकल्पः। 6.वशिष्ठहोमप्रकाराः इति।

# सन्दर्भिका

1. डोलराय मांकडः
2. महर्षिकात्ययन कृता सर्वानुक्रमाण्याम्
3. महर्षिकात्ययन कृता अनुक्रमणिका, सप्ताधिका, प्रगार्थ तृतीया
4. सौदासैग्नो प्रक्षिप्यमाणः
5. कुमार आग्नेयऽप्यश्यद्वासिद्धि
6. भारतवर्षीय प्राचीन चरित्रकोश
7. उमेशचन्द्र शर्मा
8. ऋग्वेदमां वशिष्ठ नुं दर्शन –पृ.–3, श्रीमांकड़
9. ऋग्वेदमां वशिष्ठ नुं दर्शन –पृ.–48, श्री डॉलरराय मांकड़
10. वैदिक साहित्य एवं संकृति–परि.–10, पृ.336, आ. बलदेव उपाध्याय
11. वैदिकसाहित्य एवं संस्कृति–10 परिच्छेदे वेदांगे–336, आ. बलदेव
12. वशिष्ठधर्मसूत्रे– अध्याय–15/14
13. वशिष्ठधर्मसूत्रे– अध्याय–15/20
14. वशिष्ठधर्मसूत्रे– अध्याय–21/30
15. वैदिक साहित्य एवं सृस्कृति–परि.–10,पृ.–337
16. वशिष्ठधर्मसूत्रे–6/1
17. वैदिक साहित्य एवं सृस्कृति–आ. बलदेव उपाध्याय, परि.–10, पृ.–337–38
18. वैदिक साहित्य एवं सृस्कृति–आ. बलदेव उपाध्याय, परि.–10,पृ. –337–38
19. वैदिक साहित्य एवं सृस्कृति–आ. बलदेव उपाध्याय, परि.–10,पृ. –339
20. वशिष्ठ धर्मसूत्रे–30/1
21. वशिष्ठ धर्मसूत्रे – 6/41
22. वशिष्ठधर्मसूत्रे – 19/4

23. धेनुं न त्वा यतिं सूर्यवंशे दुदुक्षन्नुप ब्रह्मणि सृसजे वशिष्ठः।
त्वमिन्मे गोपितं किञ्च अहा न इन्द्रः सुमतिं गन्त्व।।–4
अणासि चित्यप्रथाना सुदास इन्द्रो गाद्यान्यकृणोत्सुपास।
वार्धन्तं शिम्युचथस्य नव्यं शापं सिन्धूनामकृणोदशस्ती।।–5
पुरोष्ठा क्रतुर्वंशो यक्षुरासीज्ञाये मतक्यासो निशिता अपीव।
श्रुष्टिं चर्क्रुर्भृगवो दुह्यवश्च सखा सखाचमत्तरंद्विषूचोः।।–6
आ यक्धासो भलानसो भनन्तालिनासो विषाणिनः शिवासः।
आ चोऽनयात्सधमा आर्यस्य गव्या तृत्सुभ्यो अजगशन्युधा।।
ऋग्वेदे–सप्तममडले–दावाराज्ञसूक्ते

24. रघुवंशे–अजविलापे, सर्ग–4
25. वशिष्ठधर्मसूत्रे – 20/7
26. संस्कृतसाहित्य और संस्कृति–दशम परिच्छेद–पृ.–339
27. वशिष्ठसंहितायां आशीर्वचने–पृ–5
28. म.स.सिद्धेश्वरीशास्त्री–प्राचीन चरित्रकोश–पृ.807
29. याज्ञवल्क्यस्मृतिः –प्रथमाध्याये–4–5
30. संस्कृत साहित्य और संस्कृति–दशम परिच्छेद–पृ.–336
31. ब्रह्मर्षि वृद्धवशिष्ठ विरचिता–वशिष्ठसंहिता–गिरिजाशकर शास्त्री
32. वैदिकसाहित्य और संस्कृति, –पृ.–336
33. प्राचीन चरित्रकोश–सिद्धेश्वरशास्त्री पृ.–807
34. प्राचीन चरित्रकोश–सिद्धेश्वरशास्त्री पृ.–807
35. वैदिकसाहित्य और संस्कृति–ग्रन्थानुसारेण–बलदेव उपाध्याय,पृ.–336
36. वैदिकसाहित्य और संस्कृति–ग्रन्थानुसारेण– बलदेव उपाध्याय,पृ.–303
37. महर्षिपराशर
38. नारदसंहिता–देवर्षि नारद, 1–3
39. संस्कृत शास्त्रों का इतिहास–पृ.–57

40. संस्कृत शास्त्रों का इतिहास–पृ.58–59

41. नगेन्द्र पाण्डेय

42. प्रभवोः विभवः शुक्लः प्रमोदोऽसं प्रजापतिः।
अंगिरा श्रीमुखो भावो युवा धाता तथेश्वरः।।
बहुधान्यं प्रमाथी च विक्रमो वृषवत्सरः।
चित्रभानु सुभानुश्च तारणः पार्थिवोव्ययः।।
सर्वजित् सर्वधारी च विरोधी विकृतः खरः।
नन्दनो विजयश्चैव जयो मन्मथ दुर्मुखौ।।
हेमलम्बो विलम्बश्च विकारी शार्वरी प्लवः।
शुभकृच्छोमकृत्क्रोधी विश्वावसु पराभवौ।।
प्लवंगकीलकः सौम्यः साधारण विरोधकृत।
परिधावी प्रमादी स्यादानन्दो राक्षसो नलः।।
पि›लः कालयुक्तश्च सिद्धार्थो रौद्रदुर्मती।
दुन्दुभी रुधिरोरुद्वोगी रक्ताक्षी क्रोधानः क्षयः।।
अब्दैर्युगै पंचभिरब्दषसृजा युगानि च द्वादशः वै भवन्ति।

43. भिनति च रोहिणीचक्रं शुकः पैतृभतारकम्। , वशिष्ठ–6/21

44. यदा यदा करोत्येनां कपालास्थितमयीं धराम्।–वशिठ–7/12

45. वशिष्ठसंहितायां– अध्याय–9

46. संगीतविद्याखिल शिल्पकर्म सीमन्तचौलन्नगृहप्रवेशम्।
कार्यद्वितीये दिवसे यदुक्तं सदा तृतीये दिवसेऽपि कार्यम्।।
रिक्तासु शत्रोर्वधबन्धशस्त्र विषाग्नि घातादि च याति सिद्धिम्।।

47. वशिष्ठसंहितायां–अध्याय–16 तः 24 पर्यन्तम्।

48. कुर्यात्पुंसवनं प्रसिद्धविषये गर्भे तृतीयेभवा।
मसि स्फीततनौ तुषारकिरणे पुष्येऽथवा वैष्णवै।
वशिष्ठसंहिता–25/1

49. वशिष्ठसंहितायाम्– 26 तः 37 पर्यन्तम्

50. कृत्वा शुक्रं पृष्ठतो वामतोऽर्कं विप्रान्पूज्यमानग्रतः पूर्णकुम्भकम्।

हुर्म्यं रम्यं तोरणैः स्त्रग्वितानैः स्त्रीवी गीतवाद्यैविशेषतः।।

वशिष्ठसंहिता–38/24

51. अथ प्रतिष्ठां कथयामि रम्यक्छिवस्य विष्णोश्च तथापरेषाम्।
सौम्यायनं देवगुरौ च शुक्रे संदृश्यमाने यदि वाराकणाम्।।
वशिष्ठसंहिता – 40/1

52. कुड्धा› मस्तकाद्य› पतिते फलमुच्यते।
मस्तके राज्यनाशः स्याद्भाले फले च भूषणम्।। वशिष्ठ संहिता–177

53. वक्षःस्थले तु सौभाग्यं हृदि प्रीतिवर्द्धानम्।
पुत्रालाभस्तु कुक्षौ स्यान्नाभौ कीर्तिविवर्द्धनम्।।
वशिष्ठ संहिता–178, 179, 180–187

54. कालः एवेश्वरः साक्षःदीश्वरः काल एव सः।
विद्यते चेश्वरज्ञानी चेत्कालज्ञः स एव वै।।
तस्मानकालं न जानन्ति चोग्निनोऽपि महीतले।
तथापि देहिनां नूनं हिताय कमलासनः।। – वशिष्ठ–41/1–2

55. ततः साध्विति तद् वाक्यं ब्राह्मणाः प्रत्यपूजयः।
वशिष्ठप्रमुखाः सर्वे पार्थिक्यस्य मुखाच्युतम्।।–वशिष्ठ सं–12/2/10
यज्ञो मे क्रियतां ब्रह्मन् यथोक्तं मुनिपु›वः।
यथा न विघ्नाः क्रियन्ते यज्ञा›षु विधीयताम्।। वा.रा.–1/13/2–3

56. वाल्मीकिरामायणे– 1/18/21–22

57. मत्स्यपुराणे– 252/2–3–4

58. मानसारे–तृतीयखण्डे–पृ.–438

59. विश्वकर्माप्रकाशे, 13/11/123

60. अथ प्रवेशो नवसद्मश्च सौम्यातेन जीवसिते बलाढ्ये।
सिते च ध्रुवे शुभवासरे च वस्त्वर्चनं भूतबलिं च कृत्वा।।

61. वशिष्ठसंहिता–38 / 4

62. अपर्वूसंज्ञाः, प्रथमप्रवेशा यात्रावसाने च सपूर्वसंज्ञः।
द्वन्द्वद्वयस्त्वाग्निभयादि जातस्त्वेवं प्रवेशो त्रिविधः प्रदिष्टः।।
वशिष्ठसंहिता–38 / 3

63. वशिष्ठसंहिता–38 / 8

64. वशिष्ठसंहिता–38–6

65. यद्वास्तपूजारहितं तदत्र बलिं विना छन्नगृहं विरूपणम्।
कपाटहीनं न विशेद्यतस्तत्सर्वा पदामालयमेतदेवा।।–व.स.–38 / 23

66. वशिष्ठसंहिता –38 / 24

67. वशिष्ठसंहिता–39–1

68. वशिष्ठसंहिता–39 / 4 / 5–6

69. वशिष्ठसंहिता–39 / 58

70. –––––– भवेयुर्दशषद्विविधा ।।
धुवं धान्यं जयं नन्दं खरं कान्तिं मनोरमम्।
सुवक्त्रं दुर्मुखं क्रूरं विपक्षं धनदं क्षयम्।।
आक्रदं विपुलं चैव षोडशं विजयं गृहम्।
इत्येयं शालभेदानि शेषाणामेवमेव हि। – वशिष्ठसंहिता–39 / 97–99

71. वशिष्ठसंहिता–39 / 221–22

72. काश्यपसंहिता–पृ.–61

73. इन्द्रः, ऋषिभ्यश्चतुरर्भ्यः काश्यपवशिष्ठात्रयाेरोभृगुभ्यः।
ते पुत्रेभ्यः शिष्येभ्यश्च प्रदरुः।।–काश्यपसंहिता, –पृ.–61

74. आयुर्वेदाŠ–पृ.–194

75. आयुर्वेदाŠ–पृ.–195

76. संस्कृत शास्त्रों का इतिहास–प्र.परिच्छेद–पृ.–7

77. आयुर्वेदाŠ–पृ.–195

78. अग्निपुराण–7 / 43, पृ.–11

79. रामायणे–बालकाण्डे,–66 / 14

80. अग्निपुराणे–39 / 1,–5
81. योगवशिष्ठ–महारामायणम्–भूमिका– वैजनाथः
82. योगवशिष्ठे–प्रथमप्रकरणे–
83. योगवशिष्ठे–प्रथमप्रकरणे
84. योगवशिष्ठे–प्रथमप्रकरणे
85. योगवशिष्ठे–द्वितीयप्रकरणे
86. योगवशिष्ठे–चतुर्थप्रकरणे
87. योगवशिष्ठे–तृतीयप्रकरणे
88. योगवशिष्ठे–पञ्चमप्रकरणे
89. योगवशिष्ठे–6–निर्वाणप्रकरणे, भागद्वये
90. योगवशिष्ठे–6–निर्वाणप्रकरणे, भागद्वये
91. योगवशिष्ठे–6–निर्वाणप्रकरणे, भागद्वये
92. योगवशिष्ठे–6–निर्वाणप्रकरणे, भागद्वये
93. योगवशिष्ठे–6–निर्वाणप्रकरणे, भागद्वये
94. योगवशिष्ठे–6–निर्वाणप्रकरणे, भागद्वये
95. योगवशिष्ठे–6–निर्वाणप्रकरणे, पूर्वार्धे–52 तः 58
**96.** योगवशिष्ठे–6–निर्वाणप्रकरणे, पूर्वार्धे–74–76
**97.** योगवशिष्ठे–6–निर्वाणप्रकरणे, पूर्वार्धे–78–79 तः 102
**98.** योगवशिष्ठे–6–निर्वाणप्रकरणे, पूर्वार्धे–117 तः 122
**99.** योगवशिष्ठे–6–निर्वाणप्रकरणे, पूर्वार्धे–127 तः 165
**100.** योगवशिष्ठे–6–निर्वाणप्रकरणे, पूर्वार्धे्
101.योगवशिष्ठे–6–निर्वाणप्रकरणे, उत्तरार्धे
102.योगवशिष्ठे–6–निर्वाणप्रकरणे, उत्तरार्धे
103.योगवशिष्ठे–6–निर्वाणप्रकरणे, उत्तरार्धे
104.योगवशिष्ठे–6–निर्वाणप्रकरणे, उत्तरार्धे
105.योगवशिष्ठे–6–निर्वाणप्रकरणे, उत्तरार्धे
106.योगवशिष्ठे–6–निर्वाणप्रकरणे, उत्तरार्धे

107.योगवशिष्ठे–6–निर्वाणप्रकरणे, पूर्वाधे–साररूपेण
108.योगवशिष्ठे–6–निर्वाणप्रकरणे, पूर्वाधे–साररूपेण
109.योगवशिष्ठे–6–निर्वाणप्रकरणे, पूर्वाधे–साररूपेण
110.योगवशिष्ठे–6–निर्वाणप्रकरणे, पूर्वाधे–साररूपेण
111.प्राचीनचरित्रकोशे–पृ.–808